CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीः

श्रीमन्महाराज संस्कृत महापाठशाला पत्रिका

(त्रैमासिकी)

सम्पुटम् २३] 1947 Sept. and Dec. [सञ्चिके ३-४
सर्वजित्—शारदी-हैमन्ती

मैसूर
राजकीय शाखामुद्रालये सम्मुद्रिता
१९४८

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विषयसूचना

संख्या	विषयाः—प्रबन्धारः	पुटसंख्या
१.	सुभाषितानि .... (प्रो॥ सि. आर्. नरसिंहशास्त्रिणः, एं.ए.)	१-२
२.	होरासारः—श्री पृथुयशोविरचितः .... (ज्यौतिषरत्नं, धर्माधिकारि ब्र॥ श्री॥ करूरु शेषाचार्यैस्संशोधितः).	१०१-१०४ १-२१
३.	व्यालिशिक्षा .... (ब्र॥ श्री॥ विद्वांसः केशवशिवघनपाठिनः)	१५-३०
४.	हस्तलिखितपुस्तकानां सविवरणसूचनी	८१-१०४
५.	श्रीशारीरकाराधनम्--श्रीमदनन्तदासविरचितम् (ब्र॥ श्री॥ महाविद्वद्भिः चक्रवर्ति तिरुमलाचार्यैः शोधितम्).	१-६
६.	श्रीभास्करीय गोळयन्त्रविषयव्यावर्णनम् .... (ज्यौतिषरत्नं, धर्माधिकारि ब्र॥ श्री॥ करूरु शेषाचार्याः).	१-८

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya
864

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सम्पादकीयसमितिः

---

१. श्रीमन्तः प्रोफेसर् सि. आर्. नरसिंहशास्त्रिणः, एम्.ए., विश्रान्तमहाराजकालेज्संस्कृतप्रधानोपाध्यायाः.
(अध्यक्षाः)

२. साहित्यरत्नं, महाविद्वांसः ब्र॥ श्री॥ क. गोपालकृष्णशास्त्रिणः, विश्रान्तमहाराजकालेज्संस्कृतपण्डिताः.

३. पौराणिकरत्नं, धर्माधिकारिणः वे॥ हो. शेषाचार्याः.

४. ब्र॥ श्री॥ विद्वांसः पा. चन्द्रशेखरभट्टाः, महाराजकालेज्-संस्कृतपण्डिताः.

५. धर्माधिकारिणः ज्यौतिषरत्नं ब्र ॥ श्री ॥ करूरु शेषाचार्याः.

६. श्रीमन्महाराजसंस्कृतमहापाठशालाध्यक्षः (कार्यदर्शी).

...awan's Sri Sankarachar...
864
...PIA BAL...

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विज्ञप्तिः

भो भो महाशयाः! सहृदयाः! सप्रश्रयमिदमिदानीं विज्ञापयामः—संस्कृतविद्याभिमानिनः पुरुषप्रवराः यं कंचन विषयमधिकृत्य संस्कृतभाषामयं अनतिसंक्षिप्तविस्तरं उपक्रमोपसंहारपरिकर्मितं कस्याप्यनुद्वेगकरं अचर्चितपूर्वं कालदेशदशानुगुणं प्रपञ्चोपकारकरं धर्माद्यविरुद्धं "जीर्णमङ्गे सुभाषितम्" इति निर्वेदस्य "वीरा वाचैव केवलम्" इत्यपवादस्य वा प्रशमकरं प्रस्पष्टमुखविलासमुपन्यासं विलिख्य यदि प्रेषयेयुर्महान्तः, तेभ्यो महद्भ्यः समर्प्य अनन्तान् धन्यवादान् पत्रिकायामस्यां तमुपन्यासं पारयामः प्रकाशयितुम् ॥

यदीच्छति वशीकर्तुं जगदेकेन कर्मणा ।
परापवादसस्येभ्यो गाश्चरन्तीर्निवारयेत् ॥
न हीदृशं संवननं त्रिषु लोकेषु विद्यते ।
दया मैत्री च भूतेषु दानं च मधुरा च वाक् ॥

(संपादकस्य)

मूल्यप्रकारः

१. अस्याः पत्रिकायाः वार्षिकम् अग्रिमं मूल्यं सार्धैकरूप्यकम्.
प्रापणव्ययः (भारतमण्डले) .... पादरूप्यकम्.
२. विद्यार्थिनां पुनः एकरूप्यकम्; प्रापणव्ययः ,,
३. विभिन्नदेशे सपादरूप्यद्वयम् (3s.); प्रापणभृतिः अर्धरूप्यकम्.

पत्रिकाप्राप्तिस्थानम्—

संपादकः,
श्रीमन्महाराजसंस्कृतमहापाठशाला, मैसूरु.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सधन्यवादमस्माभिरङ्गीकृता एताः विनिमयरूपाः पत्रिकाः.

---

1. श्रीः, संस्कृतसाहित्यपरिषत्पत्रिका, श्रीनगरम्.
2. संस्कृतसाहित्यपरिषत्पत्रिका, कल्कत्ता.
3. उद्यानपत्रिका, तिरुवाडि.
4. सूर्योदयः, काशी.
5. संस्कृतरत्नाकरः, जयपुरम्.
6. शङ्करगुरुकुलपत्रिका, श्रीरङ्गम्.
7. अच्युतः, काशी.
8. मधुरवाणी, बेलगाम्.
9. श्रीवैष्णवसुधा, काञ्चीपुरम्.
10. The Mythic Society Journal, Bangalore.
11. Annals of the Bhandarkar Oriental Research Institute, Poona.
12. Review of Philosophy and Religion, Poona.
13. Journal of Oriental Research, Madras.
14. The Law College Magazine, Madras.
15. Sunday Edition, "The Hindu," Madras.
16. The Aryan Path, Bombay.
17. The Theosophical Movement, Bombay.
18. The Philosophical Quarterly, Calcutta.
19. Karnataka Historical Review, Dharwar.
20. Poona Orientalist, Poona.
21. Brahmavidya, Adyar, Madras.
22. The Bulletin of the Rama Varma Research Institute, Trichur.
23. The Jaina Gazette, Lucknow.
24. Journal of the Travancore University Oriental Manuscripts Library, Trivandrum.
25. Jaina Antiquary, Arrah.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

26. The Indian Theosophist, Benares.
27. Annals of Sri Venkateswara Oriental Institute, Tirupati.
28. Bulletin of the Deccan College Research Institute, Poona.
29. University Union Magazine, Mysore.
30. The Kalpaka, Coimbatore.
31. The Divine Life, Rishikesh.
32. Arya Dharma, Kumbakonam.
33. Journal of the Ganganath Jha Research Institute, Allahabad.
34. The Indian Thinker, Trivandrum.
35. The Jaina Mitra, Surat.
36. ಆಂಧ್ರ ಸಾಹಿತ್ಯಪರಿಷತ್ಪತ್ರಿಕಾ, ಕಾಕಿನಾಡ.
37. ಅಮೃತವಾಣೀ, ಬೆಂಗಳೂರು.
38. ಸನಾತನಮತಪ್ರಚಾರಿಣೀ, ಭಟ್ನವಲ್ಲಿ.
39. ಸದ್ಬೋಧಚಂದ್ರಿಕೆ, ಆನಂದವನ.
40. ತಾಯಿನಾಡು, ಬೆಂಗಳೂರು.
41. ಅಧ್ಯಾತ್ಮಪ್ರಕಾಶ, ಹೊಳೆನರಸೀಪುರ.
42. ಕರ್ಣಾಟಕ ಸಾಹಿತ್ಯಪರಿಷತ್ಪತ್ರಿಕೆ, ಬೆಂಗಳೂರು.
43. ಪ್ರಬುದ್ಧಕರ್ಣಾಟಕ, ಮೈಸೂರು.
44. ವಿವೇಕಾಭ್ಯುದಯ, ಮಂಗಳೂರು.
45. ವಿಭೂತಿ, ಸಿಕಂದರಾಬಾದ್.
46. ಗೌರ್ನಮೆಂಟ್ ಟ್ರೈನಿಂಗ್ ಕಾಲೇಜ್ ಪತ್ರಿಕೆ, ಮೈಸೂರು.
47. ಗರಿಕೆ, ಮೈಸೂರು.
48. ಪ್ರಬೋಧ, ದೂರ್ವಾಸಪುರ.
49. ತರಂಗರಂಗ, ಮೈಸೂರು.
50. ವಿದ್ಯಾದಾಯಿನೀ, ಮೈಸೂರು.
51. ಪಂಡಿತ ಮಂಡಲ ಪತ್ರಿಕಾ, ಮೈಸೂರು.
52. राजस्थान-भारती, बीकानेर.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

BACK VOLUMES

(1925 to 1941)

OF THE

MAHARAJA'S SANSKRIT COLLEGE MAGAZINE

AVAILABLE AT REDUCED PRICE

(INDISPENSABLE FOR ALL SANSKRIT SCHOLARS AND INSTITUTIONS)

		Per Volume		*Per Number*
For Gentlemen and Institutions	Re.	0 12 0	Re.	0 4 0
For Students	„	0 8 0	„	0 3 0

POSTAGE EXTRA

Apply to :—

THE PRINCIPAL,

MAHARAJA'S SANSKRIT COLLEGE, MYSORE

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रीः ॥



श्रीमन्महाराजसंस्कृतमहापाठशालापत्रिका

प्रतिमासत्रयं प्रकटीक्रियमाणा

" कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः "

(ईशोपनिषत्)

सम्पुटम् २३] 1947 Sept. and Dec. [सञ्चिके ३-४
सर्वजित्—शारदी-हैमन्ती

सुभाषितानि.

पदव्यक्तिव्यक्तीकृतसहृदयानन्दसरणौ
कवीनां काव्ये न स्फुरति बुधमात्रस्य धिषणा।
नवव्रीडावेशव्यसनपिशुनो यः कुलवधू-
कटाक्षाणां पन्थाः स खलु गणिकानामविषयः ॥ १ ॥

अनुद्घुष्टश्शब्दैरथ घटनतश्च स्फुटतरः
पदानामर्थात्मा सुखयति न तूत्तानितरसः।
यथा किञ्चित्किञ्चित्पवनचलचीनांशुकतया
कुचाभोगस्त्रीणां सुखयति न तूद्घाटितमुरः ॥ २ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

या केवलं सरसता तदपण्डितत्वं
व्युत्पत्तिरेव यदि नीरसता तदा स्यात्।
योगस्तयोस्तु घनसारकुरङ्गनाभि-
मेलापवत्परिमलं कमपि प्रसूते ॥ ३॥

अण्वपि गुणाय महतां महदपि दोषाय दोषिणां सुकृतम्।
तृणमपि दुग्धाय गवां दुग्धमपि विषाय सर्पाणाम् ॥ ४ ॥

ये दीनेषु दयालवः स्पृशति यानल्पोऽपि न श्रीमदो
व्यग्रा ये च परोपकारकरणे हृष्यन्ति ये याचिताः।
स्वस्थास्सन्ति च यौवनोदयमहाव्याधेः प्रकोपेऽपि ये
तैस्स्तम्भैरिव सुस्थिरैः कलिभराक्रान्ता धरा धार्यते ॥ ५ ॥

पुंसामुन्नतचित्तानां सुखावहमिदं द्वयम्।
सर्वसङ्गनिवृत्तिर्वा विभूतिर्वा सुविस्तृता ॥ ६ ॥

ग्रसमानमिवौजांसि सभायां गौरवेरितम्।
नाम यस्याभिनन्दन्ति द्विषोऽपि स पुमान् पुमान् ॥ ७॥
स्वभावकठिनस्यास्य कृत्रिमां विभ्रतो नतिम्।
गुणोऽपि परहिंसायै चापस्य च खलस्य च ॥ ८॥

वन्दितोऽप्येष दोषाय तद्वरं निन्दितः खलः।
स्तुतोऽप्यहिर्दशत्येव न दृढं पीडिताननः॥ ९॥
पश्चादन्यत्पुरश्चान्यत्पुनरुक्तभयादिव।
परापवादविद्वांसो वदन्त्यविकलाः खलाः॥ १०॥
पीडनं बहुधान्यस्य विधातुं लब्धजन्मनाम्।
खलानामुचितं ग्रामाद्बहिरेव निवेशनम् ॥ ११ ॥

दर्पणस्य खलु दुर्जनस्य च
ब्रूत हन्त सुजनाः किमन्तरम्।
यावदेव पुरतो वसेज्जनः
स्तावदेव हृदयेऽस्य वर्तते॥ १२॥

स्वगुणानिव परदोषान् वक्तुं न सतोऽपि शक्नुवन्ति बुधाः।
स्वगुणानिव परदोषानसतोऽपि खलास्तु कथयन्ति ॥ १३ ॥

सि. आर. नरसिंहशास्त्री,
संग्रहीता.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दारुणान्तर्दशाकाले राशिरिष्टसमन्विते ।
मरणं तस्य जानीयादन्यथा रोगमाप्नुयात् ॥ २६ ॥

राशिवद्द्वादशांशेषु फलं ब्रूयाद्विचक्षणः ।
वर्गोत्तमांशकस्थेषु तत्तद्द्विगुणमादिशेत् ॥ २७ ॥

इति श्रीवराहमिहिरसुतश्रीपृथुयशोविरचिते होरासारे
अंशशीलाध्यायस्त्रिंशः

अथैकत्रिंशोऽध्यायः

अथ नक्षत्रजातकम्

भानोस्तं (६) शशिनो नटः (१०) सनि (७) धरापुत्रस्य राहोर्दया (१८)
तापो १६ देवगुरोर्धयानन (१९) शनेः सायं (१७) विदो वत्सराः ।
केतोः सानि (७) भृगोर्नखा (२०) श्च कथितास्त्वाग्नेयनक्षत्रका-
द्धानामर्यमदैवताच्च खचरा विश्वर्क्षतः स्वामिनः ॥ १ ॥

स्वजन्मनक्षत्रविलग्नतो वा
ब्रूयात्क्रमेणैव दशाफलानि ।
दशावसानेष्वशुभं च सर्वे
कुर्वन्ति सामान्यमिदं नराणाम् ॥ २ ॥

आदित्यभौमशनिराहुदशावसाने
रोगार्थनाशकलहास्त्वशुभानि सन्ति ।
पापग्रहेण सहितस्य दशावसाने
मृत्युं वदेन्निधनसंस्थितखेचरस्य ॥ ३ ॥

पापग्रहान्वितर्क्षस्य दशायां क्लेशमाप्नुयात् ।
यावद्गते दशेशर्क्षे तत्फलं तत्र निर्दिशेत् ॥ ४ ॥

त्रिमण्डलेष्वथैकस्मिन् पापस्तिष्ठति दुर्बलः ।
सौम्यग्रहयुतो न स्याद्दशान्ते मृत्युमाप्नुयात् ॥ ५ ॥

राशिसन्धौ स्थिते काले व्याधिं तत्र विनिर्दिशेत् ।
त्रिंशद्भागमनुक्रान्ते दशान्ते मृत्युमाप्नुयात् ॥ ६ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जन्मतश्चोर्ध्वनाडीभिर्वर्धयेत्तन्महादशाम् ।
षष्ट्याहृतं फलं वर्षं शेषं मासादि कल्पयेत् ॥ ७ ॥

तस्मात्क्रमेण संयोज्य दशाप्रोक्तफलं वदेत् ।
वर्तमानदशा स्थाप्या चेष्टग्रहदशाहता ॥ ८ ॥

प्रमाणभक्ता यल्लब्धं दशास्वन्तर्दशा भवेत् ।
अन्तर्दशाफलं प्रोक्तं पूर्वमेवात्र निर्दिशेत् ॥ ९ ॥

अङ्गारकफलं केतो राहोरप्यर्कजस्य वै
शेषं समानमित्युक्तं शुभाशुभफलं वदेत् ॥ १० ॥

नक्षत्रजातकं प्रोक्तं सर्वेषां संमतं नृणाम् ।
अतिसूक्ष्मतरं ज्ञात्वा दशाफलमुदीरयेत् ॥ ११ ॥

अन्तर्दशाधिपक्षेत्रे वर्तते भास्करो यदा ।
तस्मिन् काले दशाप्रोक्तफलं भवति निश्चितम् ॥ १२ ॥

लग्नेन्द्वोर्बलवान्यो वा तस्मात्प्रभृति चिन्तयेत् ।
प्रोक्तं क्रमेण संयोज्य फलं ब्रूयाद्विचक्षणः ॥ १३ ॥

इति श्रीवराहमिहिरसुत श्रीपृथुयशोविरचिते होरासारे
नक्षत्रजातकफलाध्याय एकत्रिंशः

अथ द्वात्रिंशोऽध्यायः.

अथ जातकलक्षणम्.

एकान्ते जनरहिते शुद्धे देशे सुखासनो भूत्वा ।
प्रणिपत्य स्वाचार्यं विघ्नेशं च ग्रहान् सर्वान् ॥ १ ॥

मौनी मान्यमतिः सन् सूर्याभिमुखोऽभिविश्य दैवज्ञः ।
अथ शकुनादीन् सम्यक् परीक्ष्य यत्नाच्च सिद्धसेनोक्तान् ॥ २ ॥

शस्त्राभिघातकलहप्रपातदुःखानि दुर्निमित्ताद्याः ।
जायन्ते गणितादौ मरणवियोगार्थनाशसूचनदाः ॥ ३ ॥

कृकलासोरगगोधाकपालनग्नादिदर्शनं नेष्टम् ।
तेषां कथाप्रलापैरनर्थमायान्तमीरयेन्नूनम् ॥ ४ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वामे रुतं तु गौल्याः क्षुतं च वामेतरस्थले न शुभे ।
जम्बुकमहिषशुनां च स्वरश्च तद्वत् समीपतो मृत्युः ॥ ५ ॥

वाक्प्रश्नपरिज्ञानं शुभाशुभं तत्र चिन्तयेन्मतिमान् ।
वर्षद्वयादधस्तात् पूर्वोक्तफलं समादिशेत्तज्ज्ञः ॥ ६ ॥

कर्तुर्वयः प्रमाणं मासं नक्षत्रलग्नहोराद्यम् ।
गतकलिदिवसान् ज्ञात्वा ग्रहचारं प्रारभेत पुण्यतिथौ ॥ ७ ॥

मृदुशीघ्रवक्रकाले मूढोदययुद्धकालभेदेषु ।
पैतामहवरगणिताद्भूयोभूयोऽवधानतो गणयेत् ॥ ८ ॥

अतिसूक्ष्मतरं ज्ञात्वा गतिं ग्रहाणामनेन चारज्ञः ।
द्रेक्काणनवमभागद्वादशखगुणां (३०) शकार्द्धैश्च ॥ ९ ॥

प्राक्फलदावर्ककुजौ बुधगुरुमन्दास्तु पृष्ठफलदाः स्युः ।
उदयफलं शीतांशोः शुक्रस्य फलं गतिसमानम् ॥ १० ॥

वक्रानुवक्रकाले भृगुचारो ज्ञातुमेव न च शक्यः ।
तस्माद्बहुप्रकारैर्गणितविशेषैश्च चिन्तयेत्तज्ज्ञः ॥ ११ ॥

इष्टं स्फुटं दिविचरं नवभिर्गुणयेद्विशोषयेत्क्रमशः ।
मण्डलहृतावशिष्टं तस्यैवांशस्फुटं समानं तत् ॥ १२ ॥

इष्टः स्फुटश्च खचरो द्वादशगुणितः स्फुटेन संयुक्तः ।
मण्डलहृतावशिष्टो ज्ञेयो राश्यंशकस्फुटः सुधिया ॥ १३ ॥

एकादशांशभानुस्फुटयोगफलं निशाकरे योज्यम् ।
चतुरंशं शेषाणामेवं कुर्याद्धनक्षयं तुल्यम् ॥ १४ ॥

शुक्रज्ञयोर्द्विगुणितं भानुस्फुटवद्धनक्षयं कुर्यात् ।
मूढोदयवक्रेषु च कुर्यादेवं तयोस्तु नान्यत्र ॥ १५ ॥

रक्तसुमाक्षतगन्धैः संपूज्य दिवाकरं नमस्कृत्य ।
प्रष्टा (कर्ता) स्वशक्तिविभवैर्दैवज्ञं पूजयेद्ग्रहान् ध्यात्वा ॥ १६ ॥

आयुःप्रमाणमस्मिन् गतागतं वर्तमानमशुभशुभम् ।
एतत्सर्वं श्रोतुं भवत्प्रसादात्प्रयोगमिच्छामि ॥ १७ ॥

प्रारभ्य सन्मुहूर्ते सुचन्द्रताराबलान्विते प्रष्टुः (कर्तुः) ।
जातमखिलं च विलिखेन्नान्यमनाः स्वायुरादिकं प्रष्टुः (कर्तुः) ॥ ॥ १८ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

फलदं ज्योतिश्चक्रं ग्रहर्क्षचारस्तथैव गुणकारः ।
दैवज्ञः कालनरश्चैवं संभावयेन्नरश्रेष्ठः ॥ १९ ॥

पृथुविरचितमन्यैः शास्त्रमेतत्समस्तं
तदनु लघु मयेदं तत्प्रदिष्टार्थमेव ।
कृतमिह हि समर्थं धी(वाग्वि)विषाणामलत्वे
मम यदि न स(हिदुरु)दुक्तं सज्जनैः क्षम्यतां तत् ॥ २० ॥

होराशास्त्रसमुद्रं प्रमथ्य धीमन्दराद्रिणा सम्यक् ।
लोकस्यालोककरः शास्त्रशाशाङ्कः सुमुत्क्षिप्तः॥ २१ ॥

इति श्रीवराहमिहिरसुत श्रीपृथुयशो विरचिते होरासारे
जातकलक्षणध्यायो द्वात्रिंशः
समाप्तश्चायं होरासारग्रन्थः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रीः ॥

होरासारः

श्रीमद्वराहमिहिरार्यसुतेन दैवविद्वरेण

श्रीपृथुयशसा

विरचितः

श्रीमहीशूरपुरमहाराजसंस्कृतमहापाठशालायां विश्रान्तज्योतिश्शास्त्र
प्रधानोपाध्यायेन ज्यौतिषरत्नबिरुदेन संस्थानधर्माधिकारिणा

करूरु शेषाचार्येण

संशोधितः

संक्षिप्तग्रन्थार्थबोधिकया भूमिकया संवलितः

मैसूरु

राजकीय शाखामुद्रायन्त्रालये सम्मुद्रितश्च विजयतेतराम्

SAN. M. III & IV. 2A

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रीः ॥

होरासारभूमिका

यत्रातपत्रचामरसदृशे निर्दोषशुभगुणखनित्वे ।
नक्तंदिवमासाते स सन्ततं पातु मां तुरङ्गमुखः ॥ १ ॥
वेदविलोचनमवनौ त्रिस्कन्धं ज्यौतिषं हि यदुपज्ञम् ।
स जयति मरीचिमाली लक्ष्मीधाम्नो निकेतनं भगवान् ॥ २ ॥
गतवर्तमानगम्यजदृढादृढोभयविचित्रकर्मफलम् ।
बोधयदमलं नृणां होरातन्त्रं विभाति गहनतरम् ॥ ३ ॥
निजमतिमन्दरसुमथितहोरादुग्धाब्धिलब्धतत्त्वसुधाम् ।
यो मे पिताऽदिशदमुं कलये श्रीरामभद्रदैवविदम् ॥ ४ ॥
मनसि कविज्योतिर्वित्पण्डितरत्नं प्रगल्भगणकमणिम् ।
अग्रजमगाधधिषणं गोपालार्यं गुरूत्तमं कलये ॥ ५ ॥
गर्गपराशरशुकहरिमणित्थचाणक्यसिद्धसेनमयाः ।
श्रीपतिवराहकेशवमुखाश्च होराविदः प्रसीदन्तु ॥ ६ ॥

अयि सहृदयाः सुधीमणयः—विस्पष्टमेवेदं भवतां सारासारविदाम् । यद्गणित होरा संहिताभिधस्कन्धत्रयसंवलिते विपुलतमे ज्योतिश्शास्त्रे द्वितीयस्कन्धरूपं नाडीवलय फलक चक्र शङ्कु यष्टि जल वालुकादि स्फुटतरयन्त्रविनिश्चितजनिकालसापेक्षं जन्मकालिक दृक्समगणितसिद्ध स्फुट खचरोपखचर भाव बलादिबहुविधोपकरणभासुरं तनुभृतां गतवर्तमान भावि जनिजशुभाशुभफलबोधनबद्धपरिकरं विधातृविलिखित ललाटरेखापठनसाधकतमं जगदुपकारकं भुवि समिन्धे होरातन्त्रमिति ।

यदाहुर्जातकपद्धति बृहज्जातक फलदीपिका सारावलीषु होराविदग्रिमाः श्रीपति वराहमिहिर मन्त्रेश्वर कल्याणवर्माणः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ज्ञेयोऽत्र प्रथमं हि जन्मसमयश्छायादियन्त्रैः स्फुट-
स्तत्कालप्रभवा विलग्नसहिताः कार्यास्ततश्च ग्रहाः ।
सिद्धान्तोक्तपरिस्फुटोपकरणैस्तेचासकृत्कर्मणा
भावाः खेटदृशो बलानि च ततस्तेषां विचार्याणि षट् ॥
कर्मार्जितं पूर्वभवे सदादि यत्तस्य पक्तिं समभिव्यनक्ति ।
लग्नं होरा कल्यदेहोदयाख्यं रूपं शीर्षं वर्तमानं च जन्म ।
धर्मेश्वरेणैव हि पूर्वजन्मवृत्तं भविष्यज्जननं सुतेशात् ।
विधात्रा लिखिता रेखा ललाटेऽक्षरमालिका ।
दैवज्ञस्तां पठेद्व्यक्तं होरानिर्मलचक्षुषा ॥ इति ॥

किञ्च जातकशास्त्रमिदं षष्टिघटिकात्मकेऽहोरात्र एव सकलग्रहर्क्ष-गतीनां चिन्तनीयतया तत्रैव तनुभाजां जनन जीवित सुखदुःखानुभवनिध-नानां विज्ञेयतया चाहोरात्रशब्दे प्रथमतुरीयवर्णयोर्लोपेन होरापदाभिधेयमभूत्। अमुमंशमाहतुः श्रीवराहमिहिरकल्याणवर्माणौ—

होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात् ।
आद्यन्तवर्णलोपाद्धोरास्माकं भवत्यहोरात्रात् ।
तत्प्रतिबद्धः सकलो ग्रहभगणश्चिन्त्यते यस्मात् ॥ इति ॥

अपि च तन्त्रमिदं ब्रह्मबृहस्पतिवसिष्ठादिभिरष्टादशभिर्मुनिभिः प्रवर्ति-तमास्ते ।

तेषां नामान्येवं बोध्यानि—

ब्रह्माचार्यो वसिष्ठोऽत्रिर्मनुः पौलस्त्यलोमशौ ।
मरीचिराङ्गिरा व्यासो नारदः शौनको भृगुः ॥ १ ॥
च्यवनो यवनो गर्गः कश्यपश्च पराशरः ।
अष्टादशैते गम्भीरा ज्योतिश्शास्त्रप्रवर्तकाः ॥ २ ॥
॥ इति ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवमन्येप्यसित देवल शुकादयो महर्षयः प्रवर्तका आसन्नित्यवगम्यते। तैः परं प्रणीताः प्रवन्धाश्च साम्प्रतं कालदौर्ललित्येन लुप्तप्राया अभूवन्। तत्प्रबन्धानुरोधेनैव होराग्रन्थान् प्रणिन्युर्हौरिकमणयः श्रीवराहामिहिर श्रीपति केशव कल्याणवर्म वैद्यनाथ गणेश जीवनाथ दुण्डिराज कृष्णामिश्रमन्त्रेश्वरादयः।

अथ ग्रन्थकृतः स्वनाम पितृनाम प्रदर्शनम्.

तेष्वेकतमोऽयं श्रीपृथुयशा होरासारकारः। महीशूरपुरराजकीय प्राच्यकोशागारस्य होरासारतालपत्रपुस्तके प्रत्यध्यायमवसाने " इति पृथुयशोविरचिते होरासार " इति दर्शनादसावस्य ग्रन्थस्य प्रणेतेति स्पष्टतरं प्रतीयते। होराविदुत्तंसोऽयमादित्यदासतनयस्य तदवाप्तबोधस्य सवितृलब्धवरप्रसादस्यावन्तिकस्य श्रीमद्वराहामिहिरार्यस्य तनुजः। अयमेवामुमंशं ब्रवीति स्वकृतप्रश्नषट्पञ्चाशिकायां मङ्गलश्लोके—

प्रणिपत्य रविं मूर्ध्ना वराहमिहिरात्मजेन पृथुयशसा।
प्रश्ने कृतार्थगहना परार्थमुद्दिश्य सद्यशसा—इति॥

अथ पृथुयशसो जीवितकालः.

अस्य तातपादेन दिगन्तरविसृत्वरकीर्तिप्रकरेण ज्योतिर्विदामग्रेसरेण श्रीवराहमिहिरेण यवनपुरे पञ्चसिद्धान्तिकायां प्रथमे करणावताराध्यायेऽष्टमश्लोकेऽहर्गणसाधनावसरे सोमदिनेऽभीष्टशककालात् सप्ताश्विवेद (४२७) मितशकशोधनस्योक्तत्वान्महाभागोऽयं हयनेत्राम्बुधि (४२७) मिते शालिवाहशके वेदाभ्रशर (५०४) समे क्रिस्तशके भुवस्तलमलंचकारेति स्फुटं प्रतीयते। तथा च तत्पद्यम्।

सप्ताश्विवेदसंख्यं शककालमपास्य चैत्रशुक्लादौ।
अर्धास्तमिते भानौ यवनपुरे सोमदिवसाद्ये॥ इति॥

प्रसङ्गवशादिदमुच्यते ज्योतिर्विन्मणिना श्रीमद्वराहमिहिरेण कृता दश प्रबन्धाः। ते चैवम्। बृहज्जातकं लघुजातकं बृहद्यात्रा लघुयात्रा योगयात्रा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बृहद्विवाहपटलं लघुविवाहपटलं पञ्चसिद्धान्तिका बृहत्संहिता लघु (समास) संहिता चेति। इदमत्रोच्यते। श्रीवराहमिहिरेण बृहत्संहितायामुपनयनाध्याये निगादितेन "वक्रानुवक्रास्तमयोदयाद्यास्ताराग्रहाणां करणे मयोक्ताः। होरागतं विस्तरशश्च जन्म यात्राविवाहैः सह पूर्वमुक्त" मित्यष्टमपद्येन बृहत्संहितायाः पूर्वमेव सर्वेऽपि ग्रन्था निरमायिषतेति स्पष्टमवगम्यत इति।

अथैवमभ्यूह्यते श्रीवराहमिहिरेण मुनिनेत्राब्धि(४२७) मिते शककाले स्वस्य त्रिंशे वयसि पञ्चसिद्धान्तिकाग्रन्थोऽकारीति यदि कल्प्येत तदा तस्य तादृशे वयसि समुद्भूतेन स्वसुतेन श्रीपृथुयशसा पञ्चविंशे वयसि होरासारग्रन्थो विनिर्मितः स्यादिति वक्तुं शक्यमिति। एवमुभयोः कुत्रापि जन्मशककालस्यानुपलम्भात् पञ्चसिद्धान्तिकाप्रणयनकालस्य परममुपलम्भाच्च युक्त्यानेत्रेषुवेद (४५२) मिते शके खगुणशर (५३०) मिते क्रिस्तशके होरासारप्रबन्धप्रणयनं सिध्यति। एतेन श्रीवराहमिहिरपृथुयशसोर्जीवितकालः सिद्धः षट्छततमे क्रिस्तशके।

अथ पृथुयशसो वैदुष्यनिरूपणम्।

असौ श्रीपृथुयशाः स्वतातपादवद्भास्करोपासकः। अतोऽयं स्वग्रन्थयोर्होरासारषट्पञ्चाशिकयोरादौ भगवन्तं मरीचिमालिनमभिष्टौति प्रणमति च द्वाभ्यां पद्याभ्याम्। एवं ते पद्ये—

जयति जगदेकहेतुर्विश्वात्मा सर्वलोकदीपकरः।
अनुदिनमुदयविनाशस्थितिकर्ता भास्करो दिनाधीशः॥ १॥
प्रणिपत्य रविं मूर्ध्ना वराहमिहिरात्मजेन पृथुयशसा।
प्रश्ने कृतार्थगहना परार्थमुद्दिश्य सद्यशसा॥ इति॥

महाभागोऽयं सर्वात्मना स्वपितुर्ग्रन्थशैलीं फलकथनरीतिं चावलम्बमानो होरासारे प्रायोऽत्रार्यावृत्तैस्तत्रतत्रानुष्टुभादिभिर्विविधवृत्तैश्च जातकविषयान् विशदयति। किञ्चानेन बृहज्जातके पद्येषु स्वतातेनोदिता बहवः शब्दाः प्रयुक्ताः प्रत्यभिज्ञाप्यन्ते। अपि चामुना बृहत्संहितायां स्वजनकेन

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सप्तषष्टितमे पञ्चोत्तरशततमे चाध्याये बृहज्जातकेऽष्टाविंशेऽध्याये चोक्तानि पद्यानि होरासारे षोडशे द्वात्रिंशे चाध्याये सादरमनूद्यन्ते। तानित्थं बोध्यानि—

स्निग्धद्विजत्वङ्नखरोमकेशा
 च्छाया सुगन्धं च महीसमुत्था।
तुष्ट्यर्थलाभाभ्युदयान्करोति
 धर्मस्य चाहन्यहनि प्रवृत्तिम् ॥ १ ॥

स्निग्धा सिताच्छहरिता नयनाभिरामा
 सौभाग्यमार्दवसुखाभ्युदयान्करोति।
सर्वार्थसिद्धिजननी जननीव चाप्या
 छाया फलं तनुभृतां शुभमादधाति ॥ २ ॥

चण्डा धृष्या पद्महेमाग्निवर्णा
 युक्ता तेजोविक्रमैः सप्रतापैः।
आग्नेयीति प्राणिनां स्याज्जयाय
 क्षिप्रं सिद्धिं वाञ्छितार्थस्य दत्ते ॥ ३ ॥

ज्योतिश्शास्त्रसमुद्रं प्रमथ्य मतिमन्दराद्रिणाथ मया।
लोकस्यालोककरः शास्त्रशशाङ्कः समुत्क्षिप्तः ॥ ४ ॥

पृथु विरचितमन्यैः शास्त्रमेतत्समस्तं
 तदनु लघु मयेदं तत्प्रदिष्टार्थमेव।
कृतमिह हि समर्थं धीविषाणामलत्वे
 मम यदि न सदुक्तं सज्जनैः क्षम्यतां तत् ॥ ५ ॥ इति ॥

अत्र ग्रन्थकृता होराशास्त्रसमुद्रं प्रमथ्य धीमन्दराद्रिणा सम्यागिति मम यदि च दुरुक्तमिति च किञ्चित्पाठविपर्यासः कृतः। एवं सूक्ष्मेक्षिकया ग्रन्थकारोऽयं सर्वथा वैदुष्येण स्वपितरमनुकरोति। किञ्चानेनात्र प्रतिपादिताः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वजनकानुक्ता बहवो विशेषविषयाः। किञ्चासौ मय यवन सिद्धसेन प्रबोध माण्डव्य विष्णुगुप्त जीवशर्म ब्रह्मशौण्डानां प्राचां होराविदां नामोल्लेखनेन स्वग्रन्थस्य तदुक्तार्थप्रतिपादकत्वेन प्रामाणिकतां स्पष्टयति।

अथ ग्रन्थपरिशीलनम्।

होरासारे द्वात्रिंशदध्यायाः सन्ति। अध्यायानां नामान्यत्र संयोजितया तदनुक्रमणिकया विज्ञायन्ते। प्रबन्धेऽत्र दशाधिकद्विशतोत्तरसहस्रं (१२१०) पद्यानि विद्योतन्ते। अत्र समुल्लिखिताः कतिपये विशेषांशाः परं यथार्हमध्यायक्रमेण प्रकाश्यन्ते। तथा हि।

प्रथमाध्याये।

सन्धिर्नाम एकस्य विरामः अपरस्यारम्भश्चेति। आश्लेषामघयोः ज्येष्ठामूलयोः रेवत्यश्विन्योश्च यथाक्रममन्तिमप्रथमपादयोः प्रत्येकं द्वे द्वे घटिके नक्षत्रगण्डान्तकालः त्रिस्रस्तिस्रो नाडिका इति केचित्। लग्नस्य ललाटरेखेति नामान्तरम्।

द्वितीयाध्याये।

ग्रहाणां वयांसि। तत्र रवेः पञ्चाशत् शशिनः सप्ततिः भौमस्य (शैशवदशा) सप्त, बुधस्य (कौमारदशा) विंशतिः, गुरोस्त्रिंशत्, भृगोः षोडश, शनिराह्वोश्च शतमिति।

तृतीयाध्याये।

ग्रहाणां राशेरादिममध्यान्तिमभागबलानि। तत्र रवी राशेरादौ बली मध्ये मध्यबलः अन्ते विबलः—शीतगुरादौ विबलः मध्ये मध्यबलः अन्ते बली। कुजः आदौ बली मध्ये विबलः अन्ते मध्यबलः। बुधगुरू आदौ मध्यबलौ मध्ये पूर्णबलौ अन्ते विबलौ। शुक्रः आदौ विबलः मध्ये बली अन्ते मध्यबलः। शनिः आदौ विबलः मध्ये मध्यबल अन्ते बली—इति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

राहुकेत्वोर्बलानि ।

राहुर्मेष वृष कर्कि वृश्चिक कुम्भेषु दर्शपरिवेषकालयोः राशिनिर्गम-समये च बलवान्भवेत् । केतुर्वृषकन्याचापापरार्धमीनेषु केतुशक्रचापदर्शन-कालयोर्निशि च बली स्यात् ।

चतुर्थाध्याये

प्रसवमासज्ञानम् । प्रतिमासं योषितः स्वजन्मराशेरनुपचयस्थानगे विधौ कुजेन युते दृष्टे तद्वर्गगे वा सति यद्रजो भवति तदेव गर्भधारणार्हम्। ऋतूद्गमाद्याः षोडश निशा ऋतुकालः । तास्वाद्याश्चतस्रो रजन्यो न निषे-कार्हाः । उर्वरितासु निशासु स्वदशान्तर्दशाविधया मुहूर्तविधया च पुंस्त्री-गर्भोद्भवार्हे—यस्मिन्समये नीरुजाया युवतेर्मदनगृहे पत्या रेतः सिच्यते स एव निषेककालो गर्भाधानकालो वा भवति ।

तत्कालजं लग्नमेव निषेकलग्नं गर्भाधानलग्नं वा स्यात् । तल्लग्ने चरे दशमे मासि प्रसवः स्थिरे—एकादशे उभये द्वादशे इति । गर्भस्थशिशु-ज्ञानम् । गर्भे कीदृशः शिशुर्वर्तत इति नारी नरो वा यस्यां दिशि स्थित्वा पृच्छति तद्दिशि यो राशिः स एवारूढः । तस्मिन् पुंराशौ सति पुंग्रहेण युते दृष्टे वा सति गर्भस्थः पुमान् । तस्मिन् स्त्रीराशौ सति स्त्रीग्रहेण सहिते विलोकिते वा सति गर्भे स्त्री इति ।

यद्वा पुंराशिस्पर्शे पुमान् । स्त्रीराशिस्पर्शे स्त्री। वपुषि दक्षिणभाग-स्पर्शे पुरुषः वामभागस्पर्शे तु वनिता ।

प्रसवकालज्ञानम्। निषेककाले प्रश्नकाले वा स्फुटेन्दुर्यस्मिन्नवांश-राशौ वर्तते तस्मात्सप्तमे राशौ गोचरे शशिनि सति सूतिः । यद्वा तत्कालस्फुट-लग्ननवांशपस्य गृहं गते सति विधौ प्रसूतिः । इति।

पञ्चमाध्याये

अरिष्टनिरूपणम् । पित्रोर्दोषैर्बालग्रहैर रिष्टयोगैश्च बाला म्रियन्ते । तस्मादाद्वादशाब्दं मर्त्यानामायुर्न ज्ञायते । युगपत् कर्कटाश्लेषयोरवसाने

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सिंहमघयोरादौ च घटिकार्धं गण्डान्तकालः। एवमेव वृश्चिकज्येष्ठयोश्चाप-मूलयोर्मीनपौष्णयोर्मेषदस्रयोश्च बोध्यम्। अस्मिन् गण्डान्तकाले जातः पितृ-मातृकुलान्तको मृतश्च भवति। यदि जीवेत्स भूपालः स्यात्। मेषादिराशी-नामजादिक्रमेणेन्दोर्मृत्युभागाः पठिताः। तदुद्भवो विपद्यते।

षष्ठाध्याये

विंशत्यब्दादितः शताब्दान्तं यथार्हं संक्षिप्यायुस्सङ्ख्यावर्षाण्यमितायूंषि च प्रतिपादितानि।

सप्तमाध्याये

आयुर्व्यवस्थाः। अत्र षड्विधान्यायूंषि कथ्यन्ते। तानीत्थम्। पैण्डं नैसर्गिकं जीवशर्मजमंशजं भिन्नाष्टवर्गजं समुदायाष्टवर्गजं चेति। तत्रादितश्चतुर्णामायुषामानयनरीतिर्दशान्तर्दशारीतिश्च बृहज्जातकरीत्यैवात्रापि निरूपिते। किंतु पृथुयशसा तेष्वादितश्चतुर्ष्वायुष्षु नीचार्धहरण शत्रुक्षेत्रहरणास्तहरण दृश्यार्धहरणैः साकं रणभङ्गत्र्यंशहरणमर्केन्द्वोरुपरागपादहरणं चेति हरणद्वयमधिकमुक्तम्। आहत्य षट् हरणान्युक्तानि। राशौ द्वयोर्बहूनां ग्रहाणां वा योगे तत्र बलिन एव चक्रपातहरणं कार्यम्। आयुषि क्रूरोदयहरणं नोक्तम्। अंशायुषिभरणमङ्गीकृतम्। पैण्डायुषि लग्नायुरेवम्। लग्नेशेन यावन्तो नवांशा भुक्तास्तावन्ति वर्षाणि लग्नं प्रयच्छति। किंतु यदि शतद्वयकलाभिर्द्वादशमासा लभ्यन्ते तदा लग्नेशाध्युषितनवांशगतकलाभिः कियन्त इत्यनुपातेन लब्धा मासाः। तच्छेषं त्रिंशता गुणितं तेनैव हरेण भक्तं दिनानि भवन्ति। तच्छेषं षष्ट्या गुणितं तेनैव हरेण भक्तं घटिकाः। एवं विघटिका अपि। एवमागतं मासादिकं गतवत्सरगणे योज्यम्। एवं कृते लग्नदायो भवतीति। अत्रान्यो विशेषः लग्ने शुभान्विते सबले वा सति पापयुते विबले वा सति यथाक्रमं स्वतुरियांशेन लग्नायुर्योज्यं वियोज्यं च कार्यम्। एवं सति स्फुटो लग्नदायो भवति। शिष्टेषु त्रिष्वायुष्षु विलग्नायुर्लग्नभुक्तनवांशसमम्। शेषमनुपातेन कर्तव्यम्। पूर्वोक्तविशेषस्तेष्वपि समानः। चतुर्णामायुषां संभव-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्रमः। यद्यर्को बली यदिवाधियोगसम्भवः यदि वा लग्नं शुभर्क्षं सप्तमं च ग्रहयुक्तं भवति तदा पैण्डायुः साध्यम्। चन्द्रे प्रबले नैसर्गिकायुः। लग्नाच्चन्द्राद्वा यदि धनव्ययौ ग्रहयुक्तौ यदि वा गुरुर्हिबुके दशमे वा यदि बुधवर्जं सर्वे ग्रहा नीचसमीपगा बलवार्जिता वा यदि वा खगो लग्ने सप्तमे वा तदा जीवशर्मायुः प्रसाध्यम्। अंशलग्ने प्रबले वा तुङ्गस्वमित्रर्क्षांशेषु सर्वेषु ग्रहेषु सत्सु वा अर्केन्दुलग्नैरसंयुतेषु वा सर्वखगेषु तर्ह्यंशायुः कर्तव्यमिति।

अथ भिन्नाष्टवर्गायुः

तत्राष्टावयवाः सन्ति। ते चैवम्। १. बिन्दुसमुदायः २. त्रिकोणशोधनम्. ३. एकाधिपत्यशोधनम्. ४. राशिगुणकः. ५. ग्रहगुणकः. ६. नाक्षत्रायुः. ७. हरणम्. ८. सौरायुश्चेति। तथाहि। प्रतिग्रहं राशिचक्रे रव्यादि सप्तग्रहाणां लग्नस्य चोक्तस्थानेषु विलिखितानां बिन्दूनां योगो बिन्दुसमुदायः। तत्सङ्ख्या रव्यादीनामेवं ज्ञेया। तत्र रवेरष्टचत्वारिंशत्. ४८. शशिनः एकोनपञ्चाशत्. ४९. भौमस्य एकोनचत्वारिंशत्. ३९. बुधस्य चतुष्पञ्चाशत्. ५४. गुरोः षट्पञ्चाशत्. ५६. भृगोर्द्विपञ्चाशत्. ५२. शनेरेकोनचत्वारिंशत्. ३९. ॥ इति ॥

आहत्य सर्वाष्टवर्गबिन्दुसङ्ख्या सप्तत्रिंशदुत्तरशतत्रय ३३७ मिता। त्रिषु त्रिकोणराशिषु यत्र बिन्दुरल्पस्तत्सम एव बिन्दुरन्यस्मिन् राशिद्वयेऽपि निधेय इति साम्प्रदायिकाः। शेषमुक्तवत्कार्यम्। एवं त्रिकोणशोधितबिन्दुभिरेवैकाधिपत्यशोधनमुक्तवत्कार्यम्। तच्छोधनलब्धबिन्दुयोग एव शोध्यपिण्ड इति कथ्यते। कर्कि सिंहयोस्तु प्रथमशोधन लब्धा एव बिन्दवः स्थाप्याः। प्रतिराशि द्वितीय शोधनजाङ्का राशिगुणकैर्गुण्याः। तदनु तद्गुणगुणिताङ्का ग्रहयोगे ग्रहगुणकैर्गुण्याः। अन्यथा तथैव विन्यस्याः। राशौ ग्रहयोर्ग्रहाणां वा योगे प्रत्येकं तादृशाक्षा ग्रहगुणकारगुणिताः सङ्कलय्य निधेयाः। अथ तेषां सर्वेषां योगः सप्तभिर्गुण्यः सप्तविंशत्या भाज्यः। फलं वर्षाणि। यदि लब्धिः सप्तविंशतेरधिका तदा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मुहुः सप्तविंशत्या भाज्या शेषं वत्सराः। अन्यथा सैव ग्राह्या। इदमेव मण्डलशोधनम्। अत्र मण्डलं सप्तविंशत्यात्मकम्। प्रथमादिशेषं द्वादशादिगुणकैर्गुणितं प्रथमहरेण तष्टं फलं मासादिकं भवति। इदमेव प्रत्येकं खगस्य नाक्षत्रायुः। अथ तत्र सप्त हरणानि स्युः। तानीत्थम्। पूर्वोक्तैर्नीचार्धादिहरणैः षड्भिः सार्धमन्योन्यार्धहरणमाधिकमुक्तं भवतीति। ग्रहस्य बहुषु हरणेषु प्राप्तेषु सत्सु तत्राधिकमेकमेव हरणं विधेयम्। इत्थमानीतानां हृतानां ग्रहायुषां योगो वाराङ्क ३२४ गुणितो मातङ्क ३६५ भाजितः समष्टिसौरायुर्भवति। इदमेव भिन्नाष्टवर्गायुः।

ग्रहायूंषि प्रत्येकं हृतानि वाराङ्क गुणितानि मातङ्क हृतानि पृथक् पृथक् सौरायूंषि भवन्ति। पुर्वायुष्युक्तो दशान्तर्दशा क्रमोऽत्रापि बोध्यः। अत्र लग्नं राशितुल्यानि हायनानि दिशति। यद्यष्टादशशत (१८००) मितराशिकलाभिर्द्वादशमासादयो लभ्यन्ते तर्हि लग्नभुक्तकलाभिः किमित्यनुपातेन मासादिकं फलं भवति। तद्गतवत्सरसमुदाये योज्यम्। एवं कृते लग्नायुः स्यात्। इदं समष्ट्यायुषि संयोज्यम्। अयमेव भिन्नाष्टवर्गजः समस्तशुद्धायुःपिण्डः। इदमायुः केन्द्रेष्वन्यतमस्थे शशिनि ग्रहयुते दशमर्क्षे क्रूरसौम्य खेटयुक्ते वा सति साध्यम्।

अथ समुदायाष्टवर्गायुः

भुवि फलके पत्रे वा नव पूर्वापररेखास्त्रयोदश याम्योत्तररेखाश्च कार्याः। एवं कृते सति षण्णवतिकोष्ठकं चक्रं भवति। प्रथमदक्षिणोत्तररेखाया उपरि कोष्ठकप्रान्तेषु रव्यादयः सलग्ना लेख्याः। प्रथमपूर्वापर रेखाया दक्षिणतः कोष्ठकपार्श्वेषु मेषादयो द्वादशराशयो विलेख्याः। प्रति खेटं प्रति लग्नं चाधस्ताद् द्वादश राशयः स्युः। प्रतिराशि याम्योत्तररेखयोर्मध्येऽष्टावष्टौ कोष्ठकानि भवेयुः। तत्तद्ग्रहाधिष्ठितराशिभ्यः सप्तदशाध्यायोक्त तत्तत्खेटसर्वाष्टवर्गवाक्यगता द्वादश बिन्द्वङ्काः क्रमोत्क्रमाल्लेख्याः। तानि च वाक्यानि "बालो बलिष्ठो लवणागमोऽसुर इत्यादिमानि "शूली

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मम प्रीतिकरोत्रतीर्थकृदि " त्यन्तान्यष्टौ द्वादशवर्णात्मकानि—इति। प्रति राशि कोष्ठकाष्टकानामुत्तरपार्श्वेषु तत्तत्कोष्ठकसङ्कालिताङ्कसंख्या लेखनीयाः। तासां योगो हयगुणगुण ३३७ मितो भवति । ता द्वादश सर्वसङ्ख्याः कस्मिंश्चिद्राशिचक्रे मेषवृषादिक्रमेण लेख्याः । प्रतिग्रहमधस्तनद्वादशराशिसंयोजिताङ्कसङ्ख्या अधः प्रान्तेषु प्रदर्शनीयाः ।

तासां सर्वासां सङ्ख्यानां योगोऽपि सप्तत्रिंशदुत्तरशतत्रय (३३७) मितो भवति। अत्र बालबोधाय किमपि जन्मराशि चक्रमालम्ब्य समुदायाष्टवर्गचक्र बिन्दु सङ्कालिताङ्कानां विन्यसनक्रमः प्रदर्श्यते ।

	केतुः	शनिः	
	जन्मराशि		कुजः गुरुः
लग्नं	चक्रम्		
	चन्द्रः	राहुः	रविः बुधः शुक्रः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समुदायाष्टवर्ग चक्रम्

रा	र	चं	कु	बु	गु	शु	श	ल	यो
मेषः	५	५	६	२	४	३	१	५	३१
वृषः	३	२	७	५	७	४	३	२	३३
मिथुनः	५	२	२	५	३	३	२	६	२८
कर्कटः	७	२	४	७	२	६	४	१	३३
सिंहः	२	३	५	३	२	३	४	२	२४
कन्या	३	७	३	३	१	२	४	२	२५
तुला	३	१	५	१	२	३	३	६	२४
वृश्चिकः	३	२	२	५	३	३	३	७	२८
धनुः	३	३	३	२	४	३	४	१	२३
मकरः	२	५	४	६	२	४	४	५	३२
कुम्भः	३	२	४	६	४	४	४	३	३०
मीनः	४	२	४	१	२	२	६	५	२६
यो	४३	३६	४९	४६	३६	४०	४२	४५	३३७

इति राशिचक्रविलिखितानामङ्कानां पूर्ववत् त्रिकोणशोधनमेकाधिपत्य-शोधनं च कार्ये । द्वितीयशोधनानुपदं राश्यङ्कानां द्वादशाङ्काधिक्ये ते द्वादशभिर्भाज्याः । शेषमेव ग्राह्यम् । इदमेव मण्डलशोधनम् । अत्र-मण्डलं द्वादशात्मकम् । शिष्टाङ्कान् राशिचक्रे संस्थाप्य तेषामुक्तवद्राशि-ग्रहगुणकाः कार्याः । तादृशगुणकसंगुणिताङ्कानां योगः कर्तव्यः । स च सप्तभिर्गुण्यः । सप्तविंशत्या विभाजनीयः । लब्धिः शताधिका यदि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सा शतेन हरणीया। शेषमेव ग्राह्यम् । सा शतसमा यदि सैव ग्राह्या दीर्घायुर्योगसम्भवे। नान्यथा पूर्वशेषं द्वादशादिभिर्गुण्यं पूर्वहरेण भाज्यम्। लब्धं मासादिकं भवति। एवमागतं नाक्षत्रं समस्तायुर्वाराङ्केन ३२४ गुण्यं मातङ्केन ३६'५ भाज्यम्। एवं कृते समस्तं ग्रहसौरायुर्भवति । अत्रापि लग्नायू राशिसमाब्दप्रमितम् । पूर्ववदनुपातेन मासादिकं कल्प्यम् । इदं पूर्वानीतसमस्तायुषि संयोजितं यदि समुदायाष्टवर्गशुद्धायुः पिण्डो भवेत्। अत्र समष्ट्यायुषि पृथक् पृथग्ग्रहायुर्विभागक्रम एवम् । यदि लग्नायुर्विरहितेन सङ्कलितभिन्नाष्टवर्गायुषा हरणलब्धग्रहायूंषि लभ्यन्ते तदा समुदायाष्टवर्गायुषा कानीत्यनुपातेन पृथग्ग्रहदाया भवेयुः। अत्र नाडीकृतैः प्रमाणफलेच्छाराशि-भिर्गणितकरणे निरन्तरं खेटायुः स्यात्।

पूर्वोक्तवद्दशान्तर्दशाक्रमोऽप्यत्रापि ज्ञेयः।

आयुर्मार्गश्चतुर्विधः

१. उच्चनीचदशामार्गः—पैण्डं नैसर्गिकं जीवशर्मजं चायुः।

२. अंशमार्गः—अंशजायुः।

३. भेदमार्गः—भिन्नाष्टवर्गायुः।

४. ऐक्यमार्गः—समुदायाष्टवर्गायुः॥ इति॥

इदमायुः सर्वग्रहेषु नीचारिभांशगेषु समर्क्षांशगेषु वा सत्सु साध्यमिति यवनाचार्यो ब्रवीति । इदमायुश्चन्द्रमासि सग्रहे केन्द्रस्थे शेषखेटेषु केन्द्रबाह्येषु च प्रसाध्यमिति मणित्थो ब्रूते । षष्ठाष्टमव्ययेषु पापेषु ग्रहेषु सत्स्वल्पमायुः शुभेषु दीर्घायुः मिश्रेषु मध्यायुश्च स्यात्। पैण्डादि षड्विधायुष्षु प्रत्येकं ग्रहायुषः संभवाद्दशान्तर्दशाविभागैः फलं वक्तुं शक्यम्। योगपठितेषु संख्या-मितेष्वल्पमध्य दीर्घायुष्षु पृथग्ग्रहायुषोऽसंभवाद्दशादिविभागाभावाच्च दशादि फलं वक्तुं न शक्यते।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अष्टमाध्याये

बलिनो लग्नार्कचन्द्राः प्रत्येकं क्रमशस्त्रिधा विभक्तस्य गणितागतायुष आदौ मध्येऽन्ते च सुखप्रदाः स्युः । स्वर्क्षतुङ्गमित्रभवर्गगो जन्माधिपः पापैरदृष्टो यदि शुभप्रदः स्यात् । तृतीयषष्ठलाभेषु सर्वे शुभखगाः स्थिता यदि बाल्ये सुखप्रदाः । तेषु पापाश्चेदन्त्यवयसि सुखदाः । अर्थान्मिश्रखगा- यदि मध्ये वयसि सुखदायकाः । स्वर्क्षतुङ्गमित्रगृहांशेषु रिपुनीचर्क्षसप्तमेषु वा स्थितस्य ग्रहस्य दशा मिश्रफलप्रदाऽपरार्धे शुभफलप्रदा च भवति ।

नवमादिपञ्चदशान्तेष्वध्यायेषु

रव्यादीनां यथाक्रममारोहावरोहयोरुच्चनीचयोः षष्ठाष्टमयोः प्रत्येकं राशिषु च दशाफलकथनम् ।

षोडशाध्याये

ग्रहाणां शुभ पाप गृह तदुभयांश षष्ठाष्टमव्यय नीचारिभवन स्वर्क्ष- तुङ्गकेन्द्रत्रिकोणोपगमर्धमकर्मकोणाद्यधीश्वरराहुनीचशत्रुपापग्रहसंसर्ग वक्रग- मनादिभिः संकीर्णफलकथनं रुचक भद्र हंसमालवशशयोगानां निरूपणं नृणां पार्थिवाप्यतैजसवायवनाभसच्छायानिर्वचनपूर्वकं फलकीर्तनं च ।

सप्तदशाध्याये

भिन्नसमुदायाष्टवर्गाभ्यां मातापितृ भ्रातृ पुत्र कलत्रादि शुभाशुभफल सुखदुःखदेहास्वास्थ्यादीनामदृढकर्मफलानां वर्णनम् ।

अष्टादशाध्याये

बृहज्जातकवर्त्मनैवान्तर्दशानयनं कृतं ग्रहदशास्वन्तर्दशाफलान्युक्तानि अन्तर्दशाविशेषफलानि बहून्युक्तानि । तेषु कानिचनोच्यन्ते । जन्मकाले दाराधिपो यस्मिन्नंशे वर्तते तदधिपतेरन्तर्दशायां कलत्रलाभः । राहुर्यत्रांशेऽ- स्ति तत्पतेः पाके मृतिः । स्फुटानां षष्ठाष्टमव्ययेशानां यो योगराशिस्तं शनौ गते सति भ्रातुर्निधनं स्फुटार्कस्य कलाः राहुकलाभिर्गुण्याश्चक्रकलाभि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(२१६००) भाज्याः लब्धं कलात्मकं स्यात् । तत् स्पष्टरवौ योज्यम् । तत्र योराशिर्भवति तन्मासे मृतिः स्यात् इति ।

एकोनविंशाध्याये

चान्द्रा नाभसाश्च योगा उक्ताः तेषु कतिचिदुच्यन्ते । वेसि वास्युभयचरी शुभाशुभकर्तरीयोगाः पर्वत कुण्डल षट्पद वराह महेन्द्रयोगाश्चेति ।

विंशाध्याये

राजयोगाः कथिताः तेषु भाग्ययोग एवमुक्तः । पुंसो दिवा जनने सलग्नेषु सर्वेषु ग्रहेष्वोजराशिस्थेषु च सत्सु भाग्ययोगः । इतोऽन्यथा स्त्रिया भाग्ययोगः । इति ।

एकविंशद्वाविंशत्रयोविंशाध्यायेषु

रव्यादीनां भावफलानि कर्माजीवः द्वित्र्यादिग्रहयोगफलानि च निरूपितानि ।

चतुर्विंशाध्याये

अत्र बहवोऽनिष्टयोगा दर्शिताः । तत्र कतिपये विविच्यन्ते । पापेषु सप्तमाष्टमगेषु लग्नेशे नीचक्षांशगते च सति गुलिककाले जातः कुलनाशको भवति । कुजसौरौ केन्द्रगौ लग्ने राहुः शुभाः षष्ठव्ययस्थाश्च यदि चण्डालयोगः स्यात् अत्र जातो निजवंशकर्महीनः । विलग्नगमन्दराशिस्थे चन्द्रे केन्द्रे शनौ व्यये गुरौ च सति भिक्षाशी भवति ।

पञ्चविंशाध्याये

स्त्रीजातकफलानि सम्यगुपवर्णितानि ।

षड्विंशाध्याये

नैर्याणिकयोगेषु कतिचिदुच्यन्ते । अर्के राहुकेत्वोरन्यतरेण युक्ते सप्तमगे शुक्रे रन्ध्रगते पापे तनुगते च सति मृतिरुद्बन्धनेन जायते । लग्नेशे पापद्वयमध्यगे केन्द्रस्थे ग्रहे निधनस्थे च सति स्वकोपदोषेण निधनम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अर्ककुजौ व्ययगौ शशिराहू सप्तमगौ गुरुः केन्द्रस्थश्च यदि प्रवासभुवि सुरालयोद्यानयोर्वा निर्याणम् ।

सप्तविंशाध्याये

बृहज्जातकरीत्यैवात्रापि नष्टजातकविधिरुक्तः किं तु तत्र केचन विशेषा वर्ण्यन्ते । प्रश्नलग्ने यावन्तो भागा भुक्तास्तावत्यो जन्मघटिका ज्ञेयाः । तादृशलग्ने दिनरात्रिराशौ सति क्रमशो दिननिशयोर्जन्म । प्रश्नकाले य आरूढ राशिः स एव जन्मराशिः । आरूढाद्यावत्प्रश्नलग्नं स्यात् तावती संख्या द्वाभ्यां गुण्या तात्कालिकनक्षत्रसंख्यया योज्या सप्तविंशत्या भाज्या लब्ध-मश्विन्यादितो गण्यं तदेव जन्मनक्षत्रम् ।

अष्टाविंशैकोनत्रिंशत्त्रिंशाध्यायेषु

नक्षत्रशीलराशिशीलराश्यंशशीलफलांशारिष्टानि व्यक्तं निरूपितानि ।

एकत्रिंशाध्याये

स्वपित्रानुक्तो नक्षत्रदशान्तर्दशाक्रमः संक्षिप्तफलकथनरीतिश्च प्रदर्शिता ।

द्वात्रिंशाध्याये

दैवज्ञप्राश्निकयोः कृत्यं शकुनादिभिः संक्षिप्तफलं सज्जनप्रार्थनं स्वग्रन्थस्य सारतरत्वं च निदर्शितानि ।

अयमत्रोपसंहारः

एवं भूमिकायां ग्रन्थप्रणयनकालः द्वात्रिंशदध्यायोक्तकतिपयमुख्य-फलानि च निरुक्तानि । अपभ्रंशजटिलः प्रबन्धोऽयमवहितमनसा महता परिश्रमेण द्वित्रतालपत्रपुस्तकसाह्येन च मया यथाधिषणं परिशोधितः । तत्र तत्र प्रायो वर्तमानाच्छन्दोभङ्गाबोधकदुरर्थबोधकव्याकरणाविरुद्ध-शब्दाः समीकृताः । केषु चित् स्थलेषु विभक्तिलिङ्गक्रियाविपरिणामपदा-ध्याहारैरर्था बाध्याः । शोधनावसरेऽत्र ग्रन्थे मानुषसहजेन मतिभ्रमेण

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ये केचन प्रामादिका विषया यदि निपतितास्ते संशोधनीयाः कृपालुभिः साधुभिर्महद्भिर्दैवज्ञैरिति तान् सविनयं साञ्जलिबन्धमभ्यर्थयामि । अपिचानेन ग्रन्थशोधनेन भूमिकालेखनेन च प्रीणातु परमकारुणिकः परमपुरुषः सहस्र-रश्मिबिम्बमध्यगः सर्वेश्वरः श्रीवल्लभ इति सर्वं निरवद्यम् ॥

तारणनामन्यब्दे माघे नीले दले भृगोर्दिवसे ।(२–२–१९४५)
पञ्चम्यां शेषकार्विहोरासारस्य भूमिकां व्यतनोत् ॥

एवमावेदकः सज्जनवशंवदः

करूरु शेषाचार्यः

ज्यौतिषरत्नम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

होरासारस्याध्यायानुक्रमणिका

१. राशिविभागाध्यायः
२. ग्रहलक्षणाध्यायः
३. बलनिरूपणाध्यायः
४. निषेकजन्माध्यायः
५. अरिष्टयोगाध्यायः
६. योगायुर्ज्ञानाध्यायः
७. आयुर्दायाध्यायः
८. दशाफलनिरूपणाध्यायः
९. सूर्यदशाफलाध्यायः
१०. चन्द्रदशाफलाध्यायः
११. कुजदशाफलाध्यायः
१२. बुधदशाफलाध्यायः
१३. गुरुदशाफलाध्यायः
१४. शुक्रदशाफलाध्यायः
१५. शनिदशाफलाध्यायः
१६. संकीर्णफलाध्यायः
१७. अष्टवर्गफलाध्यायः
१८. दशान्तर्दशाफलाध्यायः
१९. चान्द्रनाभसयोगाध्यायः
२०. राजयोगाध्यायः
२१. ग्रहभावबलाध्यायः
२२. कर्माजीवाध्यायः
२३. रव्यादिग्रहयोगफलाध्यायः
२४. जातकभङ्गाध्यायः
२५. स्त्रीजातकाध्यायः
२६. नैर्याणिकाध्यायः
२७. नष्टजातकाध्यायः
२८. नक्षत्रशीलाध्यायः
२९. राशिशीलाध्यायः
३०. अंशशीलाध्यायः
३१. नक्षत्रजातकाध्यायः
३२. जातकलक्षणाध्यायः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ननु त्रिक्रमचतुष्क्रमपञ्चक्रमेषु क्रमव्युत्क्रमयोः आद्यान्त्यपदयो-रावर्तनवत् मध्यस्थपदस्यापि किमावर्तनं कार्यमेव? इत्यतो नेत्याह ॥

क्रमेऽवसानस्यान्त्यत्वादाद्यस्य व्युत्क्रमेऽन्त्यतः ।
तयोरावर्तनं युक्तं न मध्ये त्रिक्रमादिके ॥ ११ ॥

अन्त्यत इति भावपरोनिर्देशः । अन्त्यत्वादित्यर्थः । त्रिक्रमादिके त्रिक्रम चतुष्क्रम पञ्चक्रमेषु, जटायां क्रमे अवसानपदस्य अन्त्यत्वात् व्युत्क्रमे आद्यपदस्य अन्त्यत्वात् तयोः अन्त्याद्यपदयोः, "मोषुणः, आसुष्माणः, ऊर्ध्वऊषुणः, अगादारंगुकृष्णा, निरुस्वसारमस्कृतोषसम्, इत्यादिक्रमेषु क्रमेणावस्थितयोः—नः मो नः आसु, नः ऊर्ध्वः, कृष्णा अगात्, उषसं निः, इत्यादिरूपयोः आवर्तनं आवर्त्यपठनं युक्तम् । विप्रतिपन्नानि द्विती-याद्यपदानि आवर्त्यपठनीयानि क्रमान्त्यपदत्वात्, अर्धर्चान्त्यक्रमान्त्यपदव-दिति युक्तियुक्तमित्यर्थः । मध्ये व्युत्क्रमस्यमध्ये मध्यस्थपदे, 'सु, स्म, ऊँइति सु, अरैक् ऊँइति, ऊँइति स्वसारं अकृत, इत्येवं रूपेषु मध्यस्थेषु पदेषु आवर्तनं न युक्तम् । कुतः? अन्त्यपदत्वाभावात् इति भावः । किं तु व्युत्क्रममध्ये एकवारपठनमेव कार्यम् । आवर्तनस्य अन्त्यपदमात्राऽऽव-र्तकत्वादित्यर्थः । [1] यथा—"मोषुणोनःसुमोमोषुणः । मोइतिमो । स्वितिसु । "आसुष्माणो नः स्मास्वा ३ सुष्माणः । स्मेतिस्म । ऊर्ध्व-ऊषुणो नः सू ऊर्ध्वऊर्ध्वऊषुणः । ऊँइत्यूं । स्वितिसु । अगादारैगुकृष्णा-कृष्णो अरैगगादगादारैगुकृष्णा । अरैगित्यरैक् । ऊँइत्यूँ । निरुस्वसारम-

---

[1] विकृतिलक्षणग्रन्थेषु, जटादिविकाराः सर्वे क्रमलक्षणानुसारिणइत्युक्तम् । तस्मा-देव अत्रापि ५ वाक्ये वक्ष्यमाणजटायाः पञ्चक्रमरूपेण संज्ञाकृता । अतः "असर्व-शस्त्रिप्रभृतिष्वनेकशः स्मरन्ति संख्यानियमेन शाकलम् । इति ११-२१ प्रातिशाख्या लक्षणवाक्यानुसारेणैव अत्रापि जटालक्षणं व्याळिना उक्तम् । किं च "सहेतिकाराणि समासमन्तभाक् बहुक्रमे मध्यगतानि यानि च । तृतीयताञ्चच्छति यस्य सोष्मवान् अनन्ययोगं विकृतं, प्लुतादिच । अतीत्य तेषां पदतां प्रदर्शयेत्"। ११-२५ इति च त्रिचतुः पंचक्रमादिषु मध्यगतपदानां वेष्टनं उक्तम् ॥

विकृतिवल्याम्—चतुष्क्रमत्रिक्रमेषु तथा पंचक्रमेषु च ।
आद्यन्ताभ्यां त्रिवृन्मध्यं ब्रूयात् क्रमविपर्ययैः ॥ इति ॥

जटालक्षणवाक्यं च (६ श्लोक टिप्पण्याम्) द्रष्टव्यमत्र ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्कृतोषसमुषसमकृतस्वसारमुनिर्निरुस्वसारमस्कृतोषसम् । ऊँइत्यूँ । स्वसारमितिस्वसारम् । अकृतेत्यकृत ॥ अत्र त्रित्रिचतुःपंचक्रमभ्रम-वारणाय (मध्यगतपदानां) त्रीणि वेष्टनानि ॥

[1] न चानुमाने इतिकारगर्भत्वेनावर्तनीयत्वमुपाधिः । तस्य जप्यमान-मन्त्रेषु अध्ययनवाक्येषु च साध्याव्यापकत्वात् । न च क्रमप्रविष्टत्वरूप-पक्षधर्माविच्छिन्नसाध्यव्यापकत्वादयमुपाधिः । अध्येत्रधीयमानक्रमेषु

---

[1] " विप्रतिपन्नानि द्वितीयाद्यपदानि आवर्त्यपठनीयानि क्रमान्त्यपदत्वात् अर्ध-र्चान्त्यक्रमान्त्यपदवत् " इति ।

(अत्र द्वितीयाऽऽद्यपदानीति पक्षनिर्देशः आवर्त्य पठनीयत्वं साध्यं, क्रमान्त्य-पदत्वं हेतुः ।

" मोषुणः, " आसुष्माणः, इत्यादिस्थले ' मो, नः,
' आसु, नः, इत्यादि आद्यन्तगतपदयोरेव
आवृत्तिरिति अनेन अनुमानेन साध्यते ।

अर्थाच्च मध्यगतस्य ' सु, स्म, इत्यादेः व्युत्क्रमादिकाले नावृत्तिरिति सिध्यति) ।

अस्मिन्ननुमाने क्रमान्त्यपदत्वरूपहेतुः उपाधिरूपदोषेण असद्धेतुत्वात् विवक्षितं आवर्त्यपठनीयत्वरूपं साध्यं साधयितुं असमर्थः । तथा हि प्रकृते इतिकारगर्भत्वेन आवर्तनीयत्वं उपाधिः । उपाधिलक्षणन्तु ; साध्यव्यापकत्वेसति साधनाऽव्यापकत्वं इति । साध्यव्यापकत्वञ्च साध्यं यत्रयत्र वर्तते तत्रतत्र उक्तोपाधेर्विद्यमानत्वम् । साधनाऽव्यापकत्वन्तु, साधनं यत्रयत्र, तत्र अविद्यमानत्वम् । प्रकृते साध्यं आवर्त्य-पठनीयत्वं, तद्यत्र ? अर्धर्चान्त्यपदे । तत्र इतिगर्भत्वेनावर्तनीयत्वरूपोपाधिरपि वर्तत इति साध्यव्यापकत्वरूपं उपाधिलक्षणं आगतम् । एवं प्रकृते साधनं (हेतुः) क्रमान्त्यपदत्वम् । तद्यत्र, क्रमद्वितीयपदे (' अग्निमीळे ' ' अयन्देवाय ' इति क्रम-पारायणकाले) ' ईळे ' ' देवाय ' इत्यादौ । तत्र उक्तोपाधिर्नास्तीति, साधनाऽ-व्यपकत्वरूपलक्षणदळमपि वर्तते ।

तथा हि—' अग्निमीळे ' ' अयन्देवाय ' इत्यादौ ईळे, देवाय, इत्यादीनि पदानि (पञ्चक्रमसंज्ञाभूतजटाकालिक) क्रमान्त्यपदानि । एवं व्युक्रमेऽपि ' ईळेऽग्निम् ' ' देवायायम् ' इत्यादौ ' अग्निम् ' ' अयम् ' इत्यादीनि क्रमान्त्यपदानि । एषु पदेषु क्रमान्त्यपदत्वरूपहेतुसत्वेऽपि, इतिगर्भत्वेन आवर्तनीयत्वरूपोपाधेरभावात् साधनाव्यापकत्वरूपलक्षणदळं आगतं इति । तथा च एतादृशलक्षणोपेतस्य इति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथापि तस्य तादृशसाध्याव्यापकत्वात्। [3]नापि साधनावच्छिन्नसाध्यव्यापकत्वादयमुपाधिः इति। तस्य स्वव्य[4]तिरेकेण साध्यव्य[4]तिरेकसाधनासमर्थत्वात्।

तथाहिइतिगर्भत्वेनावर्तनीयत्वाभावेन साध्याभावसाधने जप्यमानक्रमेषु व्यभिचारः अन्त्यक्रमस्यापि अध्येतृभिरावर्तनीयत्वात्॥

गर्भत्वेनाऽऽवर्तनीयत्वरूपोपाधेः सत्वात् प्रकृतहेतुर्दुष्ट इति पूर्वपक्ष्याशयः। तदेतत् प्रकृतोपाधौ उक्तलक्षणमेव न सम्भवतीति सिद्धान्ती दूषयति तस्य "जप्यमानमन्त्रेषु" इति वाक्येन। तथा हि (जप्यमानेषु मन्त्रेषु) जपकाले आवर्त्यमानेषु मन्त्रेषु आवर्त्यपठनीयत्वरूपसाध्यसत्वेऽपि इतिकारगर्भितत्वरूपोपाध्यभावात् साध्यव्यापकत्वरूपविशेषणदळं न सम्भवतीति नोक्त दोष इति भावः। एवमेव अध्ययनकाले आवर्त्यमानमन्त्रेष्वपि साध्याऽव्यापकत्वं द्रष्टव्यम्॥ २॥ "नचेत्यादिना पुनः पूर्वपक्ष्याशङ्का। अन्यत्र आवर्त्यमानस्थले जप्यमानमन्त्रे इतिकारगर्भितत्वेनावर्तनीयत्वाऽभावेऽपि क्रमकाले आवर्त्यमानेषु 'मोइतिमो' 'स्वितिसु' 'स्मेतिस्म' इत्यादिषु इतिकारगर्भितत्वेनावर्त्यमानत्वरूपोपाधिसत्वात् उक्तदोषप्रसक्तिरस्त्येवेति भावः। अत्र समाधिः अध्येत्रधीयमानक्रमेषु तथापि तस्य तादृशसाध्याऽव्यापकत्वात् इति। अयमर्थः— अध्येतृभिः अध्यनकाले क्रमपाठदार्ढ्यार्थं आवर्त्यमानक्रमेषु क्रमप्रविष्टत्वविशिष्टाऽऽवर्तनीयत्वरूपसाध्यसत्वेऽपि इतिकारगर्भितेत्यादिरूपोपाध्यभावात् उक्तोपाधिलक्षणं न सम्भवत्येवेति॥

[3]एतदुपरि पुनःपूर्वपक्षः—"नापिसाधनेत्यादिना, अयमाशयः—उक्तद्विविधोपाधिलक्षणासम्भवेऽपि प्रकारान्तरेण तस्योपाधित्वं उच्यते, अस्ति तृतीयः प्रकारः, साधनावच्छिन्नं यत्साध्यं तद्व्यापकत्वं उपाधित्वमिति। प्रकृते च—क्रमान्त्यपदत्वरूपसाधनविशिष्टंयत् आवर्तनीयत्वरूपं साध्यं तद्यत्र "ऋत्विजमित्यृत्विजम्। "रत्नधातममितिरत्नऽधातमम्। इत्यादौ तत्र पूर्वोक्तेतिकारगर्भितत्वेनावर्तनीयत्वरूपोपाधिसत्वात् तृतीयलक्षणलक्षितोऽयमुपाधिः सम्भवत्येवेति॥ इति चेन्न॥ उपाधेरयमसाधारणोधर्मः, यत् स्वाभावेन हेतूकृतेन प्रकृतसाध्याभावं साधयतीति। तत्प्रकृते न सम्भवति। आवर्तनीयत्वाभाववान् (साध्यम्) इतिगर्भितत्वेनावर्तनीयत्वाभावात् (हेतुः) इत्युच्यमाने जप्यमानक्रमेषु अध्येत्रधीयमानक्रमेषु च व्यभिचारः। अन्त्यक्रमस्यापि अध्येतृभिः आवर्तनीयत्वेन आवर्तनीयत्वाभावरूपसाध्याभावेऽपि, इतिगर्भितत्वेनावर्तनीयत्वाभावरूपहेतोः सत्वात्" साध्याभाववतिस्थले हेतुसत्वस्यैव व्यभिचारपदार्थत्वात्॥

---

4 व्यतिरेकः—अभाव इत्यर्थः.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्क्रमे त्रिक्रमादौ मध्यस्थपदस्यापि पदधर्मो ज्ञातव्य इत्याह—

क्रमाणां त्रिक्रमादीनां व्युत्क्रमे मध्यमं पदम् ।
अप्यनावर्तितं धर्मं पदस्य प्रतिपद्यते ॥ १२ ॥

त्रिक्रमादीनां त्रिक्रमचतुष्क्रमपञ्चक्रमादीनां जटायां व्युत्क्रमे अनावर्तितमपि मध्यस्थपदं पदधर्मं ह्रस्वत्ववर्णविलोपवर्णान्तरागमरूपं प्रतिपद्यते । यथा—[1] "निराविध्यद्गिरिभ्योगिरिभ्योऽविध्यन्निर्निराविध्यद्गिरिभ्यः। अविध्यदित्यविध्यत् । [2] "योनिमारैगरैग्योनिं योनिमारैक् । अरैगित्यरैक् । [3] "अगादारैगुकृष्णाकृष्णो अरैगगादगादारैगुकृष्णा । अरैगित्यरैक् । ऊँइत्यूँ । [4] निरुस्वसारमस्कृतोषसमुषसमकृतस्वसारमुनिर्निरुस्वसारमस्कृतोषसम् । ऊँइत्यूँ । स्वसारमितिस्वसारम् । अकृतेत्यकृत । चित्कंभनेनस्कभीयान्त्स्कभीयान्त्स्कनेनचिच्चित्कम्भनेनस्कभीयान् । स्कंभनेनेतिस्कम्भनेन । अत्र संहितागतयोः 'आविध्यत्' 'आरैक्' इतिदपयोः पदकाले 'अविध्यत्' 'अरैक्' इति ह्रस्वत्वम् । तथा 'अस्कृत' इत्यत्र सकारलोपः । 'स्कम्भनेन' इतिपदे सकाररूपवर्णान्तरागमः । [6] "परी-

---

तथाच स्वाऽभावेन साध्याभावसाधकत्वरूपस्य सकलोपाधिसाधारणधर्मस्य, प्रकृते पूर्वपक्ष्युक्तोपाधौ अभावात्, अयमुपाधिरेव न सम्भवतीति, सिद्धान्त्युक्तस्य अनुमानप्रयोगस्य निर्दुष्टत्वात् तादृशानुमानेन द्वितीयाद्यपदानामेव आवर्तनीयत्वमिति, त्रिक्रमचतुष्क्रमपंचक्रमादिषु मध्यमपदस्य ':सु. स्म. ऊँ. इति, अरैक्, अकृत, इत्यादेः जटाऽऽवृत्तिर्नास्तीति सिद्धम् ॥ ११ ॥

1 "अस्त्वासतो निराविध्यत्, २. ७६. इति ऋक्प्रातिशाख्ये एतानि निपात्यन्ते ।

2 3 "योनिमारैगगादारैगारैक्, २. ७५. इति, ,, ,, ,,

4 "अस्कृतोषसम्, ४. ८८. ,, ,, ,,

5 "चित्कंभनेनोष्मलोपः, ४. २१. ,, ,, ,,

6 "हिषिंचैतत्सूत्रे, इतोषिञ्चत्, ५. १७. ,, ,, ,,

अत्र क्रमोच्चारणविषयेषु, ११ पटलेप्रातिशाख्ये ५. ६. ९. १० सूत्राणि द्रष्टव्यानि ।

(१-६) जटापरिभाषायां, लोपागमविकाराश्च प्रकृतिक्रम विक्रमः ।
ह्रस्वदीर्घौ षत्वणत्वे उपाचरितमार्षके ॥ इति ॥

किं च ७ श्लोकटीकायामुक्त जटालक्षणवाक्यमिहापि द्रष्टव्यम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तोषिश्चतसिश्चतेतः परिपरीतोषिश्चत। इति जटायां 'इत' इतिपदे विसर्गादेशस्य ओकारस्य पुनर्विसर्गरूपादेशोद्रष्टव्यः ॥ १२ ॥

मध्यपदबहिःकरणेनपूर्वपदस्य मध्यमपदान्तरित पदमेलनेन ऐकपद्यमादाय प्रवृत्तक्रमेषु कथं जटेत्यत आह—

मध्यम्पदं बहिःकृत्वा पूर्वोत्तरपदैक्यतः ।
विहितम्पदमेकं यत् तद्विलोमजटाविधौ ॥ १३ ॥
प्रवर्तितपदात्पूर्वं भवमुक्त्वा बहिष्कृतम् ।
ब्रूयादथ शुनःशेपमेकीभावयुतं पदम् ॥ १४ ॥

शुनश्चिच्छेपन्निदितम् , इत्येवं रूपं संहितायाम् ।
मध्यस्थं शुनःशेपं इत्यादिरूपपदद्वयमध्यगतम्
चिदित्यादिरूपं बहिष्कृतं पूर्वोत्तरपदैक्यात्
शुनःशेपमित्यादि पूर्वोत्तरपदमेलनादित्यर्थः ।

एकं पदं विहितं शुनःशेपमित्यादिरूपेणैकत्वेन उच्चारितं यत्पदं तत् । "शुनश्चिच्छेपन्निदितम्" इत्यादिक्रमस्य विलोमजटाविधौ व्युत्क्रमजटायां प्रवर्तितपदात् निदितमित्याद्यावर्तितपदात् पश्चात् अनन्तरं आदौ बहिष्कृतं चिदित्यादिरूपं पदं उक्त्वा अथ अतःपरं चिदित्यादिपदानन्तरं एकीभावयुतं शुनःशेपमित्यादिपदं ब्रूयादित्यर्थः । यथा—

शुनश्चिच्छेपन्निदितान्निदितश्चिच्छुनःशेपं शुनश्चिच्छेपन्निदितम् । शुनःशेपमिति शुनःशेपम् । चिदितिचित् ॥ [1]

ईयतेनराचशंसन्दैव्यन्दैव्यञ्चनराशम्समीयतईयतेनराचशम्सन्दैव्यम् । नराशम्समितिनराशम्सम् । चेति च ॥

---

[1] विकृतिवल्याम्—विलोमे पदवत्सन्धिरनानुपूर्व्यसंहिते ।
आनुपूर्व्यं क्रमे त्याज्यं व्युत्क्रमं पदवत्पठेत् ॥ इति ॥

जटापरिभाषायामपि—अनानुपूर्वसंज्ञान्तु ब्रयात् पूर्वं यथाक्रमम् ।
व्युत्क्रमेपदशः पश्चात् पुनर्ब्रूयात् यथाक्रमम् ॥
शुनश्चिच्छेपन्निदितन्निदितश्चिच्छुनःशेपम् ।
पश्चाच्छुनश्चिच्छेपंस्या देवं ब्रूयाज्जटामिमाम् ॥ इति ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नरावाशम्सम्पूषणम्पूषणम्वानराशम्सन्नरावाशम्सम्पूषणम् । नराशम्समितिनराशम्सम् । वेति वा ॥ [1]

अत्र क्रमेण " 'चित्, च, 'वा, इतीमानि बहिष्कृतपदानि । 'शुनःशेपम्, 'नराशम्सम्, 'नराशम्सम्, इतीमानि पदानि एकीभावयुतानि ॥ १३-१४ ॥

ओदन्तानां निपातानां व्युत्क्रमजटायां प्रगृह्यत्वं आश्रयणीयमेवेत्याह—

ओदन्तानां निपातानां विलोमेऽस्ति प्रगृह्यता ॥ १५ ॥

स्पष्टोऽर्थः । उपोरथेषुरथेषूपोउपोरथेषु । उपोइत्युपो । प्रोअस्माअस्मैप्रोप्रो अस्मै । प्रोइतिप्रो ॥ ओषूणोनः स्वोओषूणः । ओइत्यो । स्वितिसु ॥ 'उपो प्रो, ओ इत्येते निपाता ओदन्ताः ॥ १५ ॥ [2]

---

[1] ऋक्प्रातिशाख्ये, 'संहिता पदप्रकृतिः, २-१., 'पदान्तान् पदादिभिः सन्दधत् एति यत् सा, (संहिता) २-२ इति च यदुक्तं तस्य अपवादमपि तत्रैव अन्यत्र—

शुनश्चिच्छेपन्निदितं नरावाशम्सम्पूषणम् ।
नराचशम्सन्दैव्यन्ता अनानुपूर्व्यसंहिताः ॥ २-७८ ॥

इत्युक्त्वा —(नह्येतेषां त्रयाणां पदानामानुपूर्व्येणसंहितास्ति) ता 'अनानुपूर्व्यसंहिताः, इति संज्ञाविशेषमपि करोति । किञ्च, तत्रैव क्रमशास्त्रे—" अनानुपूर्व्ये पदसन्ध्यदर्शनात् पदन्व्यवेतं च पदंव्यवायि च " ११-१३ इत्यारभ्य वक्तॄणामसन्दिग्धतार्थं—" ततोनिराहेतरयोश्च ते पदे ततोऽव्यवेतेन परस्य संहिता " ११-१६ इति विस्तरेणचोक्तं द्रष्टव्यम् क्रम प्रकृतित्वात् अत्र ॥

उपलेखायामपि—

'शुनश्चिच्छेपन्निदितम्, २-१३ ।
'ईयते नरा च शम्सन्दैव्यम्, २-२४ ।
'नरा वा शम्सम्पूषणम्, २-२७ ।
'एतेषां मध्यम पदान्यनवसानीयानि, २-२९ ।
इति च स्पष्टं दृश्यते ॥

[2] जटापरिभाषायाम्—एतस्मादन्य ओकारः प्रकृत्या सर्वदा भवेत् ।
(एतस्मात्—आमन्त्रिताख्यादित्यर्थः)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तर्हि ओकारान्तसम्बोधनानामपि किं प्रगृह्यत्वं आश्रयणीयम्? इत्यत आह।

ओदन्तसम्बोधनानां विलोमे न प्रगृह्यता ॥ १६ ॥

ओकारान्तसम्बोधनार्थकशब्दानां विलोमजटायां प्रगृह्यत्वं न आश्रयणीयम् इत्यर्थः। यथा—"आवायोवायवावायो। 'इन्दविन्द्रायेन्द्रायेन्द्विन्दविन्द्राय'। इन्दोइतीन्दो। 'अध्वर्योंअद्रिभिरद्रिभिरध्वर्योंऽध्वर्यो-अद्रिभिः। अध्वर्योंइत्यध्वर्यो। 'अध्वर्योंद्रावयद्रवयाध्वर्योंऽध्वर्योंद्रावय। अध्वर्योंइत्यध्वर्यो। अत्र' 'वायो' 'इन्दो' 'अध्वर्यो' इत्यादीनि ओकारान्तसम्बोधनानि ॥ १६॥ [1]

तस्मादोतेत ओ ओत इति ब्रूयाज्जटाविधौ ॥
ओतेत्येवमन्यत्र किमुनोनोउ किङ्कुमुनो इति।
पादादावप्येवमथोनक्षत्राणामिति स्थले ॥
ओकारोऽयं निपाताख्यः प्रकृत्या सर्वदा भवेत्।
अथोनक्षत्राणान्नक्षत्राणामथो अथो नक्षत्राणाम् ॥
इति उदाहरणैः सह दर्शितम्भवति.

[1] जटापरिभाषायाम् ओकारान्तसम्बोधनपदानां विषये—

"पादाद्यकारो लुप्तःस्यात् पितोऽर भिति तत्तथा।
तथैवव्युत्क्रमे ब्रूयात् अतिवाय विति स्थले ॥
अतिवायोवायोत्यतिवाय विति कीर्तयेत्।
तथैवसंहिताकाले वसोऽस्मानिति सम्मतिः ॥
आमन्त्रिताख्य मोकारं पादान्त्ये पादमध्यमे।
सन्धिं याति सदेवान्य ओकारस्तु तथा नहि ॥
वसोऽस्मान् वायविन्द्रश्चाऽथोअद्य निदर्शनम्।
तथैव व्युत्क्रमे ब्रूया दिन्दोसूक्ताय तत्र तु ॥
पादमध्ये स्थितोकारो न सन्धिं यात्यनेन तु।
अध्वर्यो अद्रिभि, र्वायो अस्मानिति यथा तथा ॥
अध्वर्यो अद्रिभि श्चेति पादादित्वाद्विलुप्यते।
नतदा पादमध्ये स्यात् ताअध्वर्यो यथा तथा ॥
आमन्त्रिताख्य ओकार एवं भवति सर्वदा। इति ॥

जटालक्षणे च—प्रगृह्याणां च पूर्वेण सन्धि र्न परतः क्वचित्। इति ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवं इकारान्तेष्वपि क्वचित् प्रगृह्यसंज्ञापवादमाह ।

इकारान्तास्त्र्यक्षराश्चेवान्ता नैव प्रगृह्यकाः ॥ १७ ॥

त्र्यक्षरात्मका इकारान्ता इवान्ताः शब्दाः न प्रगृह्याः विलोमे । यथा—"दम्पतीवक्रतुविदाक्रतुविदादम्पतीवदम्पतीवक्रतुविदा । दम्पतीइवेति-दम्पतीऽइव । "उषासानक्ताविदुषीवोषसानक्तोषासानक्ताविदुषीव । उषसानक्तेत्युषसानक्ता । विदुषीवविश्वाविश्वाविदुषीवविदुषीवविश्वा । विदुषीइवेतिविदुषीऽइव । "उपधीवप्रधीवप्रधीवोपधीवोपधीवप्रधीव । उपधीइवेत्युपधीऽइव । प्रधीइवेतिप्रधीऽइव ॥ १७ ॥[1]

ईकाराद्यन्तपदेषु सापवादां प्रगृह्यसंज्ञामाह सार्धेन—

ईदूदेदोदन्तशब्दा इत्यन्तास्त्र्यक्षरा अपि ।
प्रगृह्या एव जायन्ते संहितासन्ध्यभाविनः ।
ईदूदेदोऽद्विवचनान्तैकारास्तु तथा नहि ॥ १८ ॥

ईकार ऊकार एकार ओकारान्ता द्विवचनान्ताः त्र्यक्षरान्ता अत्र्य-क्षरान्ता अपि पदकाले इतिकारान्ताः संहितायां क्वचिदपि सन्ध्यभावात्

---

[1] प्रातिशाख्ये—"प्रकृत्येतिकरणादौ प्रगृह्याः २. ५१. अस्य सूत्रस्य अपवाद-माह—"त्र्यक्षरान्तास्तु नेवे" इति ।

किञ्च—"यत्र च प्रगृह्यं एकी भवति स्वरोदयम्" ११. ३९. इति ।

(प्रतिषेधित प्रकृतिभावस्य) परिग्रहे क्रियमाणे तत्पुनः प्रगृह्यस्य प्रकृति भाव-प्रदर्शनार्थं प्रकृतिं आनयेत् इत्युक्तं भवति ॥

जटालक्षणे—त्र्यक्षरान्तप्रगृह्याणां इवशब्दे परे स्थिते ।
अनुलोमे विलोमे च सन्धिः स्या न्न परिग्रहे ॥ इति ॥

विकृतिवल्यामपि—त्र्यक्षरान्तप्रगृह्याणां उकाराऽऽमन्त्रितस्य च ।
विलोमे पदसन्धौ तु प्रगृह्यत्वं न गृह्यते ॥ इति ॥

किञ्च तत्रैव—परिग्रहावग्रहेषु द्व्युदात्तादि पदेषु च ।
उदात्तादि विधानं तत् शौनकोक्तं भवेदिह ॥

शौनकोक्तं—शौनकप्रणीत ऋक्प्रातिशाख्ये यदुक्तं तदित्यर्थः ।

इह—जटादि विकृतिपाठेष्वपि विलोम सन्धिषु च इति ज्ञातव्यम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रगृह्याएव जायन्ते । विशेषेण जटायामिति शेषः "इन्द्राग्नी आगतङ्गा तमिन्द्राग्नी इन्द्राग्नी आगतम् । इन्द्राग्नी इतीन्द्राग्नी ॥

"ऊरू तत्तदूरू ऊरूतत् । ऊरू इत्यूरू

"पादा उच्येते उच्येते पादौ पादा उच्येते । उच्येते इत्युच्येते ॥

"उभेभद्रे भद्रे उभे उभेभद्रे । उभे इत्युभे ॥

"उपोअद्दश्रन्नद्दश्रन्नुपो उपोअद्दश्रन् । उपो इत्युपो ॥

('इन्द्राग्नी इति, 'ऊरू इति, 'उच्येते इति, 'उभे इति, उपो इति इतीमानि क्रमेण ईकाराद्यन्तानि) ॥ १८ ॥[1]

उकारस्य प्रगृह्यत्वम्, क्वचित्, वकारादेशश्च दर्शयति ।

उः प्रगृह्यत्वमेत्येष मदनादिर्वतां स्वरे ॥ १९ ॥

उः उकारः प्रगृह्यत्वं एति स्वरे परे । एष उकारः मदनादिः मकार दकार नकार पूर्वस्सन् वतां वत्वं वकारादेशमिति यावत् । (वकार-रूपादेशं प्राप्नोतीत्यर्थः) आद्योदाहरणं यथा—

"असा उ अर्चिषार्चिषो असावसा उ अर्चिषा ॥

"इयमुतेत उ इयमियमुते" ॥

"गन्तवा उ उगन्तवै गन्तवा उ" ॥

द्वितीयोदाहरणं यथा—

"अयमुवाम्वाम्वयमयमुवाम्" ॥

"इमा उवाम्वाम्विमा इमा उवाम् ॥

"उभाउनूनन्नूनम्वुभा उभाउनूनम् ॥

"उदुत्यन्त्यम्वुदुदुत्यम् ॥

---

[1] ऋक्प्रातिशाख्ये—

"षष्ठादयश्च द्विवचोऽन्तभाजस्त्रयो दीर्घाः" १-७१ इति षष्ठादयः, ईकार, ऊकार, एकारादयः एते त्रयो दीर्घाः स्वराः द्विवचनाभिधायिनः प्रगृह्यसंज्ञा भवन्तीत्युक्तम् ॥

जटालक्षणे—

आकारान्तोपसर्गस्य एकारादौ क्रियापदे ।
तयोरेकार एव स्यात् ओकारादौ तथैव च ।
ईकारोकारयोश्चापि स्वरमात्रे परस्थिते ।
सन्धिङ्कुर्वीत सर्वत्र प्रगृह्याणां न कुत्रचित् इति ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तृतीयोदाहरणं यथा—

"इदमुत्यत्यद्धिदमिदमुत्यत्, ॥ उदुत्त्यत्त्यद्धुदुदुत्त्यत्, ॥

चतुर्थोदाहरणं यथा—

(यस्माइरस्यसीदुनु-) "इदुनुन्विदिदुनु, "आदूनुन्वादादूनु। ऊँइत्यूँनुतेतेनुनुते। उँइत्यूँ इति वेष्टनं सर्वत्र ॥ १९ ॥

"इदुनु, "आदूनु, इत्यादिषु व्युत्क्रमे उकारस्य तु उकारान्तर-व्यवहित नकारपूर्वकत्वात् न वकारादेश इत्यत आह—

उकारः प्राक्तनोकारेणैक्यादेव नपूर्वकः।
व्युत्क्रमे नु उ इत्यत्राप्येति वादेशमञ्जसा ॥ २० ॥

व्युत्क्रमे नु उ इत्यत्रापि उकारः प्राक्तनोकारेण नकारानन्तरभावि पूर्वतनोकारेण सह ऐक्यात् एकादेशवत्वादेव नपूर्वकस्सन् अञ्जसा निश्चयेन वादेशम् व इत्यादेशमपि एति। अपि पदेन उकाररहित नकार पूर्वकत्वञ्च समुच्चिनोति ॥ २० ॥

औकारादेशभूत वकारस्य क्वचित् लोपं दर्शयति—

परेष्पुकार ओकार आव औकारलोपिनः।
वकारो लुप्यतेऽन्यस्मिन् लुप्यते न स्वरे परे ॥ २१ ॥

विलोमजटायामिति शेषः। औकार लोपिनः औकारादेशभूतस्येति यावत्। आवः आवादेशस्य वकारः। उकारे ओकारेऽपि परे लुप्यते। न स्वरे अन्यस्मिन् परे लुप्यत इत्यर्थः। यथा—'ऊरूपादौपादा ऊरू-ऊरूपादौ॥ "उभा उ नूनन्नूनम्वुभा उभा उ नूनम्"। "ओमानमश्विना-वश्विना ओमानमोमानमश्विनौ"। "ओजीयोधृष्णोधृष्ण ओजीय ओजी-योधृष्णो, (अत्र उकारे परे वकारलोपस्य आद्योदाहरणद्वयम्), अकारे परे वकारलोपस्य द्वितीयोदाहरणद्वयम्)'[1]

---

[1] जटालक्षणे—

'ओकारस्याप्रगृह्यस्य अनोष्ठ्यान्यस्वरे परे। अकारस्य वकारस्यादोऽप्योकारस्य नत्विति ॥

ऋक्प्रातिशाख्ये—

'शेष ओष्ठ्यः, १-४७। इत्यत्र उ, ऊ, ओ, औ चतुर्णां स्वराणां ओष्ठस्थान उक्तः। भुग्नसंज्ञाविशेषसन्धिप्रकरणे च "ओष्ठ्ययोन्योर्भुग्न अनोष्ठ्ये वकारोऽत्रान्तरागमः २-३१ इति। तस्मात् अत्रापि शिक्षाकारैः तल्लक्षणमेव स्मर्यत इति ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्र्यक्षरान्तप्रगृह्याणामुकाराऽऽमन्त्रितस्य च ।
विलोमे पदसन्धौ तु प्रगृह्यत्वं न विद्यते ।

इति 'इन्द्राग्नी इति, इत्यादेर्विलोमजटायां न प्रगृह्यता इत्याह कश्चित् । तन्न । तस्य त्र्यक्षरात्मक"वान्तमात्र विषयत्वात् । अन्यथा—"दम्पतीव, इत्यादिवत् इह इन्द्राग्नी इत्यादेश्च कश्चित् वक्तव्यं स्यात् संहितायाम् ॥ २१ ॥

उकार ओकारभावङ्गतोऽपि स्यात् प्रगृह्यकः ॥ २२ ॥

विलोमे जटायां उकार ओकारभावङ्गतोऽपि प्रगृह्य एव स्यात् । "असाउ अर्चिषार्चिषो असावसा उ अर्चिषा" ॥ "अभुत्स्यु प्रप्रो अभुत्स्य भुत्स्युप्र" ॥ "अगादारैगुकृष्णाकृष्णो अरैगगाद गादारैगु कृष्णा" ॥ २२ ॥

यत्राकारोऽवगृह्यत्वे दृश्यते व्युत्क्रमे तु सः ।
इकारेणैक्यमापन्नस्तत्रैव पररूपवान् ॥ २३ ॥

यत्र एकारे अवगृह्यत्वे द्वितीयपठने अकारः, एकारगुणेन इकारेण सह ऐक्यमापन्नः एकत्वेन उच्चारणवानपि पररूपवानेव न तु वृद्धिमान् । यथा—"काममेत्येत्या कामङ्काममेत्य । एत्यास्मे अस्मे एत्येत्यास्मे । एत्येत्याऽइत्य ॥

अत्रायं विवेकः । क्रमवेष्टनपदानि द्विविधानि । अन्त्यानि अनन्त्यानि चेति । तानि उभयविधान्यपि इतिगर्भत्वेन वेष्टितान्येव । तान्यपि द्विविधानि । इवान्ताऽनीवान्त भेदात् ।

तत्र इवान्तानि पदक्रमोभयसाधारण, क्रममात्रसाधारण भेदात् द्विविधानि । तत्र आद्यानि यथा—"मेनेइवेतिमेनेऽइव । 'दम्पती इवेतिदम्पतीऽइव । "उपधीइवेत्युपधीऽइव । प्रधीइवेतिप्रधीऽइव । आर्त्नीइवेत्यार्त्नीऽइव इत्यादीनि । अत्र त्र्यक्षरात्मकानि इवान्तानि पदक्रमसाधारण्येन इतिगर्भत्वेन वेष्टितानि दम्पतीवेत्यादीनि जटायां व्युत्क्रमे न प्रगृह्यतां यान्ति ॥

अन्यानि पदक्रमसाधारण्येन इतिगर्भत्वेन वेष्टितान्यपि जटाव्युत्क्रमे प्रगृह्याण्येव ज्ञातव्यानि । तानि यथा—"मेनेइवेतिमेनेऽइव, । "अक्षी इवेत्यक्षीऽइव । 'प्रधी इवेतिप्रधीऽइव । इत्यादीनि उदाहरणानि पूर्वं निरूपितान्येव ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्वितीयानि क्रममात्रसाधारणानि क्रमकाले एव इतिगर्भत्वेन वेष्टितानि। यथा—"ग्रावाणेवेतिग्रावाणाऽइव। "गृध्रेवेतिगृध्राऽइव। 'रथीवेतिरथीऽइव'। पत्नीवेति—पत्नीऽइव। 'महिषीवेतिमहिषीऽव। इत्यादीनि। एषां पदानां व्युत्क्रमे नैव प्रगृह्यता। यथा—"ग्रावा वतत्तद्ग्रावाणेवग्रावाणेवतत्"॥ "गृध्रेवत्वृक्षं वृक्षंगृध्रेवगृध्रेववृक्षम्"॥ पत्नीवपूर्वहूतिम्पूर्वहूति म्पत्नीवपत्नीवपूर्वहूतिम्"॥

अन्यानि इवान्तानि उभयसाधारणानि प्रथीवेत्यादीनि। क्रममात्रसाधारणा न, 'मण्डूका उदकादिवेति' 'पञ्चप्रधी ँरिवेत्यादीनि'॥

अनिवान्तानि पदक्रमोभयसाधारण क्रममात्र साधारण भेदेन द्विविधानि। द्विविधान्यपि अ. आ. इ. ई. उ. ऊ. ए. ऐ. ओ. औ. इति स्वरवर्णान्तपदभेदेन अनुस्वार विसर्गान्त पदभेदेन व्यञ्जनान्त तद्रहितान्त पदभेदेन च चत्वारिंशाद्विधानि भवन्ति। तान्यपि अन्त्यानि अनन्त्यानिचेति द्विविधानि। उदाहरणानि तु विस्तरभयात् कानिचिदेव इह लिख्यन्ते।

अनिवान्तानि पदक्रमोभयसाधारणानि यथा—

द्रवत्पाणी इति द्रवत्ऽपाणी। घृतवती इति घृतऽवती।
वाजिनीवसू इति वाजिनीवसू। सुदानू इति सुऽदानू।
मधुदुघे इति मधुऽदुघे। सम्वरणे इति सम्ऽवरणे।
पृथुस्तो इति पृथुस्तो, इत्यादीनि॥

अनिवान्तानि अनन्त्यानि क्रममात्रसाधारणानि सानुस्वाराणि यथा—

"पुरोहितमिति पुरःऽहितम्। रत्नधातममिति रत्नऽधातमम्। सुरूपकृत्नुमितिसुरूपऽकृत्नुम्। सुमतीनामिति सुऽमतीनाम्। विभ्राष्टिमिति विऽभ्राष्टिम्। अभिद्युमित्यभिऽद्युम्। इत्यादीनि। एवं सानुस्वारोकाराद्यन्तानि द्रष्टव्यानि।

अथ अनिवान्तानां अनन्त्यानां सविसर्गाणां अकाराद्यन्तानां उदाहरणानि यथा—

रघुमन्यव इति रघुऽमन्यवः। निरुन्धानास इति निरुऽन्धानासः। गूर्तश्रवा इति गूर्तऽश्रवाः। वसुतातिरिति वसुऽतातिः। कविक्रतुः। रितिकविऽक्रतुः युवयूरिति युवऽयूः। सूक्तैरिति सुऽउक्तैः। विश्वायोरिति विश्वऽआयोः इत्यादीनि सानुस्वार विसर्ग व्यञ्जनान्तभिन्नानि।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अनिवान्तानि अनन्त्यानि यथा—

उपसद्यायेत्युपऽसद्याय । समिधेति सम्ऽइधा ।

द्यावापृथ्वीवी इति द्यावापृथिवी ! अस्मय्विंत्यस्मऽयु ।

पुरुमन्तू इति पुरुऽमन्तू । उभे इत्युभे ।

अव्रया इत्यवऽयै । अर्यमो इत्यर्यमो ।

सजोषसाविति सऽजोषसौ ॥

व्यञ्जनान्तानि अनन्त्यानि यथा—

उद्यन्नित्युत्ऽयन् । सम्राळितिसम्ऽराट् । समित्समिदितिसमित्ऽ-
समित् । उदुदित्युत्ऽउत् । इत्यादीनि ॥

अथान्त्यानि अनिवान्तानि सानुस्वाराणि क्रममात्रसाधारणानि यथा—

ऋत्विजमित्यृत्विजम् । सचन्तामितिसचन्ताम् । सीमितिसीम् ।
जिष्णुमिति जिष्णुम् । अङ्गिरइत्यङ्गिरः । अरङ्कृताइत्यरङ्कृताः । अग्नि-
रित्यग्निः । अग्रिगुरित्यग्रिऽगुः । अरातेरित्यरातेः । विश्वदेवैरितिविश्वऽ-
देवैः । द्योरितिद्योः । द्यौरितिद्यौः ॥

उभयातिरिक्तानि व्यञ्जनरहितान्तानि यथा—

नूतनैरुत । उतेत्युत ॥ अवतन्नरा । नरेतिनरा ॥

धियोनरा । नरेतिनरा ॥ विराजति । राजतीतिराजति ॥

सुतानामृवाजिनीवसू । वाजिनीवसू इति वाजिनीऽवसू ॥

जनाँअनु । अन्वित्यनु ॥ विक्षुयज्यू । यज्यूइतियज्यू ॥

वृषणश्च । चपौंस्ये । पौम्स्य इति पौम्स्ये । सवनेमन्दध्यै ।

मन्दध्या इति मन्दध्यै ॥ तेपितो । पितो इति पितो ॥

वृषणावभिष्टौ । अभिष्टावित्यभिष्टौ ॥

अथ व्यञ्जनान्तानि अन्त्यानि यथा—

देवेभिरागमत् । आगमत् । गमदितिगमत् ॥

पुरूधप्रजावान् । प्रजावानितिप्रजाऽवान् ॥ उपरि—

स्विदासी ३ त् । आसीदित्यासी ३ त् ॥ [1]अमाभूत् ।

अभूदित्यभूत् ॥ दिवानून् । नूनितिनून् ॥ व्यश्वैत् ।

अश्वैदित्यश्वैत् ॥ ओषधीषुनूनोत् । नूनोदितिनूनोत् ॥

इत्थास्तौत् । अस्तौदित्यस्तौत् ॥

---

[1] "द्वितीये वचने पदवत् प्लुतिः" इत्युपलेखायां वेष्टनाधिकारे । अत्र—तस्यैव इकारस्य वेष्टयमानस्य यत् द्वितीयं वचनं तत्र प्लुतिः कार्या ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उभयसाधारणानि अन्त्यानि यथा—

मातरासमीची । समीची इति सम्ऽईची ॥
पितरेवशम्भू । शम्भूइतिशम्ऽभू ॥
इयक्षसिप्रयज्यो । प्रयज्योइतिप्रऽयज्यो ॥
इति वेष्टनविवेकः ॥

समया नाना भवन्ति, तत्र कथम् जटा कार्या इत्यत आह—

आद्यं पदद्वयं शुद्धं उत्तरं तु पदत्रयम् ।
अधिकं वाऽथ सर्वं वा समयोऽर्धर्चे उच्यते ॥ २४ ॥

तत्रादिमे पदद्वन्द्वे जटां कृत्वा जटीकृतौ ।
द्वितीयं समयाद्यं च संय्योज्योक्त्वा जटां ततः ॥ २५ ॥

सर्वस्मिन्नुत्तरेऽर्धर्चे समये संहितां पठेत् ।
पदत्रयादौ समये शुद्धस्याद्यपदद्वयम् ॥ २६ ॥

संहितामवधीकृत्य ब्रूयाच्छुद्धं पदं यदि ।
एवमेव तदा शुद्धावध्युक्त्वा संहितां ततः ॥ २७ ॥

शुद्धमन्त्यमुपान्त्यश्च समयस्यान्तिमं पदम् ।
योजयित्वा जटामुक्त्वा पदं शुद्धं च वेष्टयेत् ॥ २८ ॥

यत्रार्धर्चे आद्यं पदद्वयमेव शुद्धं भवति, उत्तरं पदत्रयं पदचतुष्टयात्मकं वा उत्तरं सर्वमर्धर्चे वा (पदपाठे पदानि यत्र न भवन्ति) स समय उच्यते। (समयस्यैव संज्ञाभेदेन अध्येतृभिः ''गणान्त'' इति नामोच्यते।) तत्र आदिमे पदद्वन्द्वे आद्ये पदद्वये प्रथमं जटां कृत्वा जटीभूते क्रमे द्वितीयं समयाद्यं च पदं संय्योज्य जटामुक्त्वा ततः तदनन्तरं उच्चरितं समये पूर्वसमयेचेत् तथाहि पठेत् इत्यर्थः । यथा—''सदस्यास्यसत्सदस्य । अस्यमदेमदेऽस्यास्यमदे । मदेसद्वस्यपीताविन्द्रः सदस्यसख्ये चकार ॥

पदत्रये जटीकृत शुद्धपदद्वयानन्तरं पदत्रयात्मके पदचतुष्टयात्मक-मात्रे वा समये शुद्धभागस्य आद्यं पदं अवधीकृत्य संहितां ब्रूयात् ॥ यथा—समाकृणोषिजीवसे जीवसे समाकृणोषिसमाकृणोषि जीवसे।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समाकृणोषीतिसम्ऽआकृणोषि । जीवसेविविजीवसे जीवसेवि । विवोमदे विश्वासम्पश्यन्तसम्पश्यन्विश्वाविश्वासम्पश्यन् ॥

उक्तान्य पदद्वयानन्तर भावि समयानन्तरं एकमेव पदं शुद्धं चेत् कथं समय संहिता पाठ्या ?

शुद्धैकपदस्य कथं वा जटा कार्या इत्यत उक्तम्—"शुद्धं पदं यदि एकमेव तदाशुद्धावाधि" इति। यदि जटीकृताद्यपदद्वयानन्तरभावि समयानन्तरं एकमेव शुद्धं पदं स्यात् तदा शुद्धैकपदमवधीकृत्य मध्यसमयसंहितामुक्त्वाततः शुद्धं अन्त्यं पदं समयस्यान्तिमं पदं अन्त्यभूतं अर्धर्चस्य उपान्त्यभूतं पदं च योजयित्वा योज्यमानपदद्वयस्य जटामुक्त्वा शुद्धान्तिमपदं वेष्टयेत्। यथा—पिबतं सोमं सोमं पिबतं पिबतं सोमम्। सोमं—मधुमन्तम्मधुमन्तं सोमं सोमम्मधुमन्तम्। मधुमन्तमश्विनावर्हि स्सीदतं सुमत्सुमत्सीदतं सीदतं सुमत्। सुमदितिसुऽमत् ॥ एतेन "यन्नासत्या-परावति यद्वास्थोअध्यम्बरेऽम्बरेऽध्यध्यम्बरे। अम्बरइत्यम्बरे ॥ इति जटा वाच्या इति च सूचितं भवति ॥ २४—२८ ॥

आद्यान्त्ये एव संशुद्धे यत्र तत्र पदे इमे ।
समयस्यादिमान्त्याभ्यां संयोज्य कथयेज्जटाम् ॥ २९ ॥

यत्रार्धर्चे आद्यान्त्ये पदे एव शुद्धे भवतः, मध्ये सर्वोऽपि समयो भवति तत्र अर्धर्चे इमे आद्यान्त्ये पदे क्रमादिति शेषः। समयस्य मध्ये गलितस्य आद्यन्ताभ्यां संयोज्य जटां कथयेदित्यर्थः। यथा—पुरुत्रावृत्र-हन्तमावृत्रहन्तमापुरुत्रापुरुत्रावृत्रहन्तमा। पुरुत्रेतिपुरुऽत्रा। वृत्रहन्तमाता-नोभूतम्पुरुस्पृहापुरुस्पृहा भूतम्भूतम्पुरुस्पृहा। पुरुस्पृहेतिपुरुऽस्पृहा। इति ॥ २९॥

आद्यमध्ये एव शुद्धे पदे द्वे यत्र तत्र तु।
आद्ये तल्लग्नसमयस्याद्योपेते जटाविधिः ॥ ३० ॥
समयस्योत्तरस्यादियुक्ते मध्ये जटाविधिः ।

यत्रार्धर्चे आद्यमध्यस्थे द्वे एव पदे शुद्धे भवतः यच्छुद्धयोर्मध्ये शुद्धान्ते च समयो भवति तत्राद्यपदे शुद्धे तल्लग्नसमयस्याद्यपदसंवन्धगलितस्याद्यपदं यदन्तेनोपेतेन सह समयपदं यत्र भवति तत्रेत्यनुवर्तते। पदद्वये इत्यर्थः। जटाविधिः सम्पद्यत इति शेषः। समयस्यादिभूतं शुद्धं पदं यथा—'क्षत्रञ्जिन्वतञ्जिन्वतङ् क्षत्रं क्षत्रञ्जिन्वतम्। जिन्वतमुताजिन्वत

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(मध्यस्थशुद्धपदं यथा) नूनहतंहतन्नूनूनहतम्। हनंरक्षांसिसेधतममीवाः। एवमेव "धेनूर्जिन्वतमुत" इत्यत्रापि जटा द्रष्टव्या॥ ३०॥

यत्रप्राक्समयस्तत्र शुद्धांशाद्यद्वयावधि।
संहितां सम्पठन्नेव विदध्याच्छुद्धयोर्जटाम्॥ ३१॥
यत्राद्यांशो भवेच्छुद्धः समयश्चोत्तरांशकः।
पूर्वांशान्त्यं तत्र पश्चात्समयाद्यपदेन च॥ ३२॥
योजयित्वा जटां तत्र जटाविकृतिकोविदः।

इत्यस्य उत्तरवाक्यादाकृष्य "शुद्धांशाद्यद्वयावधि" शुद्धांशः शुद्धो भागः तस्य ये आद्यपदे ते अवधी यस्मिन्कर्मणि तद्यथा भवति तथा, संहितां प्राग्गलितसंहितां पठन्नेव शुद्धयोः शुद्धभागाद्यपदयोः जटां विदध्यात्। प्रथमतो जटात्वेन उच्चारणं कार्यमित्यर्थः। यथा—

तवायंभागऋत्वियस्सरश्मिस्सरश्मिर्ऋत्वियऋत्वियस्सरश्मिः॥

अर्धर्चे पूर्वभागस्यैव शुद्धता दशायां कथं जटा इत्यत उक्तम्—"यत्राद्यांशो भवेच्छुद्धः" इत्यादि। यत्रार्धर्चे आद्यांशः पूर्वभागः शुद्धो भवेत्। उत्तरांशकः। स्वार्थे कः। उत्तरभागस्तु समयो भवेत्। तत्र विकृतिकोविदः विकृत्यष्टकपाठकुशलः इति यावत्। पूर्वांशान्त्यः शुद्धपूर्वभागशान्त्यपरः पश्चात् समयाद्यपदेन योजयित्वैव जटां कुर्यात् "जटात्वं प्रापयेत्ततः" समयसंहितां पठेदित्यर्थः। यथा—

"वाजवन्तामरुत्वन्तामरुत्वन्तावाजवन्तावाजवन्तामरुत्वन्ता। वाजवन्ते तिवाजऽवन्ता। मरुत्वन्ताजरितुर्गच्छतोहवम्॥

एतेन "ईयुषीणामुपमाशश्वतीनाम्" इत्यर्धर्चे "आयतीनाम्" इति शुद्धस्य मध्यपदस्य पूर्वसमयसंहितासम्बन्धेनाऽऽपद्यमानस्य उत्तरसमयादिपदसम्बन्धस्य जटाऽभावः। पुनः 'आयतीनाम्" पदसम्बन्धपूर्वकसमयसंहितान्त्यपदसंबन्धस्य पठ्यमानस्य "अद्यौत्" इत्यन्त्यपदस्य जटाभावो वेष्टनञ्च ज्ञापितं भवतीति। यथा—

("ईयुषीणामुपमाशश्वतीनामायतीनाम्प्रथमोषाव्यद्यौत्" इति पदद्वयसंहिता अर्धर्चस्य, ॥०॥ आऽयतीनाम्॥०॥ अद्यौत्॥ ॥ इति मेव पदपाठे शुद्धे पदे भवतः॥ ०॥ इत्येवं विधानि समय (गणान्त) संज्ञा चिह्नानि पदपाठे दर्शितानि। अत्र पूर्वोक्त वाक्यानामुदाहरणानि द्रष्टव्यानि।) "ईयुषीणामुपमाशश्वतीनामायतीनाम्प्र-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

No. 64 (622)

श्रीवेदान्तदेशिकमङ्गलम्

Vedantadesika Mangalam

Author—Yannacharı.
Substance—Palm-leaf.
Size—10×2 inches.
Character—Telugu.
Folios—31-31.
Lines on a page—8.
Letters in a line—30.

Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

श्रीमतेभाष्यकृद्भक्तिभूयसे कृतसंविदे ।
वादिद्विरदसिंहाय वेदान्तार्याय मङ्गलम् ॥ १ ॥
सर्वतन्त्रस्वतन्त्राय खर्वितान्योक्तिरंहसे ।
उर्वरासुमनोबृन्दसार्वभौमाय मङ्गलम् ॥ २ ॥
धैवतं मुखतस्तन्वद्दैवतं किञ्चिदीयुषे ।
पालितक्षितये सद्भिर्भावितायास्तु मङ्गलम् ॥ ३ ॥
वेदान्तबोध्यानुध्यानमो दान्तर्बाष्पचक्षुषे ।
वेदान्तगुरवे बोध श्रीदान्तायास्तु मङ्गलम् ॥ ४ ॥

उपसंहारः—

वाचासत्तां नैगमिकीं आचान्तां कुर्वतेखिलाम् ।
आचार्याणां मदीयानामाचार्यायास्तु मङ्गलम् ॥ १६ ॥
मङ्गलं निगमान्तानां गुरवे दुरितच्छिदे ।
मङ्गलं कविसिंहाय मङ्गलं करुणावते ॥ १७ ॥
पुष्कराङ्घ्रिसुवेदान्ताचार्यस्याङ्घ्रियुगेर्पितम् ।
मङ्गलाशासनं भूयान्मङ्गलाय सतामिदम् ॥ १८ ॥

प्रतिपाद्यविषयः—

अष्टादशभिः श्लोकैः वेदान्तदेशिकमङ्गलं प्रतिपादितम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

No. 65 (1146)

शान्तिविलासः

Santivilasa

Author—Nilakantha Dikshita.
Substance—Palm-leaf.
Size—16 × 1½ inches.
Character—Grantha.
Folios—139-142.
Lines on a page—10.
Letters in a line—52.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

हरिः ओम्—

वंशे कस्मिन्नजनिषि कयोः पुत्रतामग्रहीषं
कत्यश्रौषं तदपि कतिधा तच्च सद्भ्यः कतिभ्यः ।
किन्नाद्राक्षं व्यसनमपि वा किं सुखं नानुभूव-
न्नो पारंसीत्तदपि हृदयं कीदृशो मे विपाकः ॥ १ ॥
पादौ मे स्तः परमचतुरौ कीकटानेव गन्तुं
वागप्यास्ते निभृतमनृतान्येव वक्तुं वचांसि ।
दीदांसन्ते मम च मतयो दोषदृष्टौ परेषां
पङ्गुर्मूकः पशुरपि भवास्यात्मनीनेतुकृत्ये ॥ २ ॥
यामाराद्धुं न गणितमिदं जीवितं वा धनं वा
यस्याः प्रीतिर्मनसि कलिता ज्यायसी मोक्षतोपि ।
सैवेदानीं वयसि चलिते संप्रहीणे च वित्ते
तुलायापि त्रिपुरहर मां मन्यते नैव भार्या ॥ ३ ॥
कृत्वा पापान्यपि खलु मया पोषिताश्शैशवे ये
निद्राहारावपि विजहता शिक्षिता ये कलासु ।
प्रादुर्भूतास्स्वयमिव हिते प्राक्तनादृष्टलब्ध-
प्रज्ञान्मेषा इव च तनया न स्मरन्त्यात्मनामाम् ॥ ४ ॥

उपसंहारः—

नाहं याचे पदमुडुपतेर्नाधिकारं मघोनो
नापि ब्राह्मीं भुवनगुरुतां का कथान्यप्रपञ्चे ।
अन्यस्यान्यध्रियमभिलाषन्नस्तु कस्तस्य लोके
मह्यं शंभो दिश मसृणितं मामकानन्दमेव ॥ ४९ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आगर्भादाकुलपरिवृढादाचतुर्वक्त्रतोपि
त्वत्पादाब्जप्रपदनपरान्वेत्सि नश्चन्द्रमौले ।
मायायाश्च प्रपदनपरेष्वप्रवृत्तिं त्वमात्थ
स्वामिन्नेवं सति यदुचितं तत्र देवः प्रमाणम् ॥ ५० ॥

दण्डं धत्ते सकलजगतां दक्षिणो यः कृतान्तो
नामाप्यस्य प्रतिभयतनोर्नोपगृह्णीमहीति ।
प्राप्तास्स्मन्निगमवचसामुत्तरे यः कृतान्तो
यद्वा तद्वा भवतु न पुनस्तस्य पश्येम वक्त्रम् ॥ ५१ ॥

॥ शान्तिविलासं समाप्तम् ॥

प्रतिपाद्यविषयः—

अत्र लोके जातः पुरुषः अनेकविधकष्टदशां प्राप्तोपि वैराग्यं न लभते इत्यादि विषयाः लोकानुभवरूपैः श्लोकैरुपपाद्यन्ते ॥

No. 66 (1629).

शिवध्यानपद्धतिः

Shivadhyanapaddhati

Author—Appayyadikshita.	Age of MS—Old.
Substance—Palm-leaf.	Condition of MS—Not Good.
Size—8 × 1½ inches.	Correct or incorrect—Correct.
Character—Grantha.	Complete or incomplete—Complete.
Folios—10.	
Lines on a page—10.	
Letters in a line—32.	

उपक्रमः—

श्रीरस्तु । हरिः ओम् । शुभमस्तु । गुरुभ्यो नमः ।
श्रीगणेशायनमः ।

मध्ये हृदयपाथोजं महादेवासनोचितम् ।
मच्चित्ताकारशोभाढ्यं मण्टपं परिचिन्तयेत् ॥

अतिचिन्तामणिप्रख्यैः अत्यन्तस्तम्भकान्तिभिः ।
रत्नैरप्राकृतैर्लोकान् रञ्जयन्तं समन्ततः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उपसंहारः—

उमासहायं विश्वेशं ध्यात्वा प्राप्नोति मानवः ।
इत्याकलय्य शैवानि शास्त्राणि निखिलान्यपि ॥
उद्धृत्य तेभ्यः सारांशः संगृहीतो यथामति ।
श्रीपतिध्येयपादाब्जश्रीशिवध्यानपद्धतिः ॥
अनुसंधीयतां प्राज्ञैरनुसंध्यामिमां सदा ॥

शिवध्यानपद्धतिस्सम्पूर्णा ॥

प्रतिपाद्यविषयः—

एवं प्रकारेण शिवं ध्यायेदित्यादीन्युपपादितानि भवन्ति ॥

No. 67 (1481)

शिवमालिकास्तुतिः

Shivamalikastuti

Author—Anantha Narayana.
Substance—Palm-leaf.
Size—$18 \times 1\frac{1}{4}$ inches.
Character—Grantha.
Folios—4.
Lines on a page—8.
Letters in a line—64.

Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

जयति विमलतत्त्वत्सिद्धिमुक्ताफलानां
प्रसवपदमुदारं वैघ्नराजं पदाब्जम् ।
कमलमनलमाप्तुं यस्य सौन्दर्यलक्ष्मीः
दिशमपि कमलायाः पाणिभूषायमाणम् ॥ १ ॥

अपि कितवदुरापो यश्शिरश्शोभिधूर्तो
दधदपि वपुरर्धे यस्त्रियं त्यक्तसङ्गः ।
अपि परिकरिताभिर्योहि विश्वानवाप्य-
श्च्युतनिखिलविरोधस्त्रायतान्नः स देवः ॥ २ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परिमितमतिशक्तिर्माद्दगन्यस्तदास्ता-
मपि कृतगुरुयत्नौ पद्मभूपद्मनाभौ ।
इह नहि महिमानं शेकतुर्यस्य बोद्धुं
तदवतु महदस्मान् दैवतं दीनदीनान् ॥ ३ ॥

उपसंहार:—

दनुजमनुजतिर्यक्देवतादिप्रभेद-
न्नगणयति महार्थस्पर्शने यत्प्रसादः ।
सकृदपि भजनाद्यद्भूयसैव प्रसीद-
त्यमितमहिमधाम्नस्तस्य दासोऽस्मि धाम्नः ॥ ४९ ॥
तृणमपि नयदाज्ञामन्तरा स्पन्दते यत्
बहिरबहिरपीदं विश्वमावृत्य भातु ।
अनवद्यगुणसंपद्भिश्रमैकायनं यत्त-
द्दहरहरुदारज्योतिरैशं नमामि ॥ ५० ॥
कति कति सुकुमारास्सूक्तिपुष्पोपहाराः
पदमपि दधते ते प्राक्तनानां कवीनाम् ।
कथमियमुपरिष्टादेव तेषां भवन्ती
स्पृशतु गिरिश वाचाम्मालिकाहन्ततन्मे ॥ ५१ ॥
इति अनन्तनारायणकृता शिवमालिका स्तुतिः
संपूर्णा

प्रतिपाद्यविषयः—

अत्र एकपञ्चाशत् श्लोकैः शिवविषयकस्तुतिरुपपाद्यते ॥

No. 68 (1651)

श्रीगुणरत्नकोशव्याख्या

Sri Gunaratnakoshavyakhya

Author—Srinivasacharya
Substance—Palm-leaf.
Size—$14\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—81.
Lines on a page—6.
Letters in a line—48.

Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

हरिः ओं । श्रीरङ्गनायक्यै नमः । अविघ्नमस्तु ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उपक्रमः—

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः।
श्रीवत्साङ्कसुतश्श्रीमान् श्रेयसे मेऽस्तु भूयसे॥

श्रीलक्ष्मणार्यकरुणापरिलब्धबोध-
श्रीमन्महाजनकदेशिकशिक्षितार्थः।
श्रीश्रीनिवास इह कौशिकवंशजन्मा
व्याख्याति विष्णुरमणी गुणरत्नकोशम्॥

इह खलु हरितकुलतिलक श्रीवत्साङ्कमिश्रनन्दनः श्रीरङ्गराजतन्नायिकाभ्यां यथाविधि सकललोकसाक्षिकं नवीकृतपूर्वसंबंधः स्वजननीभूत श्रीरङ्गराज तन्नायिका निर्हेतुक परमकृपयावाप्त समस्तशास्त्रो निस्संशय-समधिगत समस्ततत्त्वरहस्यार्थविशेषः श्रीभाष्यकारपरमकृपया विजृंभितसकलाभ्युदयशाली श्रीरङ्गेशपुरोहितः श्रीभट्टार्यः स्वजननी श्रीरङ्गनायिकाचरणयुगळे सततपरिचरन्नाविष्कृत तत्स्वरूपरूपगुणविभूत्यनुभव-निरतः क्षणमपितदनुभवास्वादं विनात्मधारणमसहमानतया स्वस्य तदनुभवरसास्वादार्थं दुर्वारदुरन्ततापत्रयज्वालापटल दन्दह्यमान सकल-जन-दुःखदर्शनजनित करुणापरवशहृदयतया तदुज्जीवनार्थं कालक्षेपार्थं च गुणानुभवपरीवाहरूपं श्रीरङ्गनायिकाप्रसादाकांक्षिभिः सततमनुसन्धातव्यंश्रीगुणरत्नकोशाख्यं श्रीरङ्गनायिकास्तोत्रं चकार तत्र सकलनिगम-सारभूतं श्रीसूक्तादिभिरभिधालक्षणतात्पर्यरूपप्रवृत्तिभिः प्रतिपादितं श्रियस्सकलवेदान्ततदुपबृंहणप्रतिपाद्यत्वं यथार्थज्ञानस्य तत्कटाक्षमूलत्वं सकलैश्वर्यस्यापि तत्प्रसादमूलत्वं भगवत उभयविभूतिनिर्वहणस्य तन्मुखोल्लासार्थत्वं भगवतोत्यंतान्तरङ्गत्वं भगवतस्तदायत्तद्धित्वं स्वरूपगुण-दिव्यगुणविग्रहगुणांश्चाद्रीपराधसहत्वं तन्मूलभूतजगन्मातृत्वं निरवधिक-करुणापरवशत्वस्वाधीनपातिकत्वंसौलभ्यकाष्ठायितार्चात्मनावतीर्णत्वमौदार्यं सर्वविधरक्षणे प्राप्तत्वं सर्वविधबंधुत्वादिकञ्च प्रचिकटयिषुः प्रपन्नस्य तद्विषयेनुसन्धातव्यमर्थजातं सङ्गृह्णाति।

उपसंहारः—

तदर्थं स्वीकुर्वकस्मात्कृपां। अकस्मादागताकृपा अकस्मात्कृपा। तान्निर्हेतुकां कृपामवलम्बस्वेत्यर्थः। इहामुत्र च। यथावयं युष्मत्कैङ्कर्यरता

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्याम । यथा च यूयमैहिकामुष्मिकास्मत्सर्वविधरक्षणं कुरुध्वं तथा इतः परमपि निर्हेतुकां कृपामङ्गीकुरुध्वेति श्लोकार्थः—

इत्थं कूरपुराधिनाथतनयश्श्रीमान् सुभट्टारक-
स्तोत्रे श्रीगुणरत्नकोशविदिते श्रीरङ्गदेव्याः क्रमात् ।
वेदैकप्रतिपाद्यताञ्च परतां षाड्गुण्यमुख्याढ्यतां
भावं वैभवमर्चयावतरणं प्रोचे कृपां केवलाम् ॥

इत्थं श्रीगुणरत्नकोशविदितं श्रीलक्ष्मणाचार्यस-
त्कारुण्यामृतवारिवर्धितलसद्बोधाङ्कुरं यो निर्ममे ।
सम्यक् श्रीघनतातदेशिकदयासंप्राप्तरम्योभय-
श्रुत्यन्तार्थपटुर्यथामति सतां श्रीश्रीनिवासो मुदे ।

भट्टर् तिरुवडिगले शरणं—

अक्षरं यत्परिभ्रष्टं मात्राहीनं तु यद्भवेत् ।
क्षन्तुमर्हन्ति विद्वांसः कस्य नास्ति व्यतिक्रमः ॥

श्रीमते रामानुजाय नमः । श्रीवेदान्तगुरुवे नमः । श्रीवेङ्कटेशो रक्षतु ॥

प्रतिपाद्यविषयः—

अत्र श्रियः गुणस्वरूपकथनरूपाणां श्लोकानां श्रुतिस्मृत्याद्युक्त-प्रमाणवचनोदाहरणपूर्वकं व्याख्यानं क्रियते—

No. 69 (622)

श्रीनिवासस्तुतिः

Srinivasa Stuti

Author—Annayarya.
Substance—Palm-leaf.
Size—$9\frac{1}{2} \times 2$ inches.
Character—Telugu.
Folios—5.
Lines on a page—8.
Letters in a line—30.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

॥ शुभमस्तु श्रीनिवासस्तुतिः श्रीनिवासाय नमः ॥

श्रीमन्तस्सज्जयाचार्या गुणमाणिक्यपेटिकाः ।
कारुण्यपूरभरिता लसन्तु हृदये मम ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीवेङ्कटाचलमणीरमणीयमौळि-
केळीविलोलहृदयं सदयावलोकं ।
एकं सदद्वयमनन्तमचिन्त्यरूपं
ज्योतिः क्रियात्कमलया सहितं हितं नः ॥ १ ॥

यत्पादाञ्जनखद्युतिश्श्रुतिवधूसीमन्तमुक्तालता
यन्मायाब्धिमहोर्मिबुद्बुदततिर्वैधोण्डभाण्डच्छटा ।
यन्नाभीजलजासवांबुनि चरन्नंभश्शिशुः पद्मभूः
सोयं शेषधराधिपः प्रदिशतु श्रेयांसि भूयांसि नः ॥ २ ॥

सह रमया मुकुन्दमपि सूत्रवतीदयितं
शठरिपुनाथपङ्करुहलोचनदाशरथीन् ।
हृदि कलयामि यामुनपराङ्कुशदासयति
प्रवरमुखान्गुरूनपि समं मम तद्गुरुभिः ॥ ३ ॥

जगज्जन्मस्थेमप्रभृति विविधोल्लासरसिकं
श्रुतिश्रेणी चूडाभरणचरणांभोरुहयुगं ।
उपायं स्वप्राप्तेरुपरि विततं धाम्नि महति
प्रणौमि त्वां शेषक्षितिधरपते मुक्तसुलभम् ॥ ४ ॥

उपसंहारः—

तुङ्गे शृङ्गे श्रुतीनामकलुषमनसामन्तरङ्गेप्यभङ्गे
रङ्गे क्रूराहि भोगात्मनि च दिविषदामुत्तमाङ्गे च सन्तौ ।
सौभद्रप्राणरक्षश्शकटविघटनस्वर्धुनीस्वर्गयोषा
दोषप्रक्षोभदक्षौ मधुहरचरणौ तौ क्रियास्तां शुभं नः ॥ ५३ ॥

स्तुतिरितिकृता शेषक्ष्माभृच्छिखामधितस्थुषः
परमपुरुषस्याव्याजोद्यत्कृपारसवारिधेः ।
भवतु विदुषामेषा तोषाय सत्वमुपेयुषा
मपि च पठतां नृणां सर्वैघसङ्कटनाय च ॥ ५४ ॥

इति बुक्कपत्तनकुलांबुधीन्दुना
तनयेन तात गुरुवेंकटाम्बयोः ।
पदवाक्यमानपदवीपटीयस
स्सहजेन वेंकटगुरोश्शतक्रतोः ॥ ५५ ॥

कृतिरण्णयार्यविदुषा विनिर्मिता
फणिभूधरेन्द्रगुणरत्नसंचिता ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्वतिनां मुदेऽस्तु निरवद्यमाधुरी-
सुषमा धुरीणपदबन्धबन्धुरा ॥ ५६ ॥
श्रीमते श्रीनिवासाय नमः ।
श्रीमत्सज्ञ्जथार्यगुरुवे नमः ॥

प्रतिपाद्यविषयः—

अत्र षट्पञ्चाशच्छलोकैः श्रीनिवासविषयकस्तुतिरुपपाद्यते—

No. 70 (622)

दशावतारकथास्तुतिः

Dasavatara Kathastuti

Author—Annayarya.
Substance—Palm-leaf.
Size—$9\frac{1}{2} \times 2$ inches.
Character—Telugu.
Folios—2.
Lines on a page—8.
Letters in a line—30.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

॥ श्रीरस्तु ॥
॥ श्रीनिवासाय नमः ॥

उपक्रमः—

वरदं वरदन्ति हृदातपहृ-
च्छरदं शरदम्बुजनेत्रयुगं ।
दर दिव्यरथाङ्गधरं मधुरं
मुदिराकृतिधामधरं कलये ॥ १ ॥
कमलाकमलायतलोचन
वत्यमलायमलासयतानुगुणा ।
शमलालसमौनिमलापह
मागमलालितमेनमहङ्कलये ॥ २ ॥
उदधावुदधारिजरत्फणिनीत
विबुधारिकथामवधीरयता ।
निदधेपिच येन विधातृमुखे
विदधातु शमेषतिमीश पुमान् ॥ ३ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वरकन्दरमन्दरमन्थनतः
कलशोदधितोजनितां दयिताम ।
शयतामरसान्वयिनीं जयिनी
मयि ता दयितामवटः कमठः ॥ ४ ॥

उपसंहारः—

हलमुज्वलमुत्कलयन्
दळयन् अरिवारमवारितशौर्यभरः ।
शुभराजिमराजयथा नियतं
बलभद्रलभस्व मदीयनतीः ॥ १२ ॥

मुरळीं मुहुरीषदपिप्रसर
त्स्वरलीनमनीषिमनश्रवणां ।
करपङ्करुहे कलयन्तमिमं
मुरवैरिणमेषनमस्करवै ॥ १३ ॥

धुरिदुष्करकृत्यतुरुष्करणा
जिरशुष्करमांगपरिष्करणीं ।
करवाललतां करवारिजयो
र्दधदस्तुसुदे मम कल्किहरिः ॥ १४ ॥

इति निर्मलतिर्मलबुक्कपुरी
कुलभर्मलताग्रसुमस्तबकः ।
न्यसवीदिह वेङ्कटवर्य
सुधीरवधाय हरेरवतारकथाम् ॥ १५ ॥

इदमस्तु तमोहतिशक्ततरं
परमस्तवनं भविनाम कवनम् ।
भुवि ये कवयेयुरमेयरमे
क्षणलक्षणसम्पदमेयुरिमे ॥ १६ ॥

श्री हयग्रीवाय नमः ।
श्रीसज्जयार्य गुरुवे नमः ॥

॥ श्रीरस्तु ॥

॥ मङ्गळानि भवन्तु ॥

प्रतिपाद्यविषयः—

अत्र षोडशश्लोकैः दशावतारकथास्तुतिरूपेण उपपाद्यते ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

No. 71 (622)

नृसिंहविंशतिः

Narasimha Vimshati

Author—Annayarya.
Substance—Palm-leaf.
Size—$9\frac{1}{2}\times2$ inches.
Character—Telugu.
Folios—2.
Lines on a page—8.
Letters in a line—30.

Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—
Correct.
Complete or incomplete—
Complete.

॥ श्रीरस्तु ॥

॥ शुभमस्तु ॥

॥ श्री हयग्रीवाय नमः ॥

उपक्रमः—

॥ श्रीमद्ब्रह्मतन्त्र घण्टावतार परकाल महादेशिकाय नमः ॥

श्रीमन्तमादिपुरुषं
आश्रितरक्षणदक्षिणं प्रपद्येऽहम् ।
अस्मद्गुरुपर्यन्तानाचार्या
नपि पराङ्कुशप्रमुखान् ॥ १ ॥

श्रीमदहोबिलनगरी शेवधि
मनवधिगुणं हरिं प्रणुमः ।
मदनशतकोटि मदभरमलि
म्लुचो यस्य मधुरिमोत्कर्षः ॥ २ ॥

शठकोपपराङ्कुशयति
चरणाब्जद्वन्द्व भजननिर्द्वन्द्वा ।
अखिलोन्नतार्यपरिषन्निगमन
गोपत्यकास्थिता जयति ॥ ३ ॥

नरसिंहनगरमाश्रित
दुरिततातिक्षतिकरं शुभैर्वरणैः ।
उदित नवरत्नगोपुरकिरणै-
स्तिमिरं निरस्यदस्तु मुदे ॥ ४ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उपसंहारः—

पुरुषसिंह इति प्रथितं पदं
न विजहात्यभिधां यदुपाश्रयात् ।
तमभिधेयमकृत्रिमवाक्पदैः
निगमभूधरनाथमुपास्महे ॥ २१ ॥
अखिलचिदचिदन्तर्यामिणस्सिंहमूर्ते-
रनवधिगुणपूर्तेराश्रितस्वर्द्रुमस्य ।
स्तुतिरियमनवद्य स्तुत्यकारुण्यभूम्नो
वितरतु विबुधानां वीप्सयाभीप्सितानि ॥ २२ ॥
इति बुक्कपत्तनकुलाम्बुधीन्दुना-
तनयेन तातगुरुवेङ्कटाम्बयोः ।
पदवाक्यमानपदवीपटीयसस्सह-
जेन वेङ्कटगुरोः शतक्रतोः ॥ २३ ॥
कृतिरण्णयार्यविदुषाविनिर्मिता
नरसिंहरम्यचरितोपबृंहिता ।
कृतिनां मुदेऽस्तु निरवद्यमाधुरी-
पदवीधुरीणपदबन्धबन्धुरा ॥ २४ ॥
श्रीमद्ब्रह्मतन्त्रघण्टावतारपरकालमहादेशिकायनमः ।
श्रीमत्सज्जयार्यमहागुरवेनमः ।

श्रीरस्तु ॥ मङ्गळानि भवन्तु ॥

प्रतिपाद्यविषयः—

अत्र नृसिंहचरित्रं चतुर्विंशतिश्लोकैः सङ्ग्रहेण वर्ण्यते ।

No. 72 (1060)

सपर्यापर्यायस्तुतिव्याख्या

Saparyaparyayastuti Vyakhya

Author—
Substance—Palm-leaf.
Size—14 × 2 inches.
Character—Grantha.
Folios—14.
Lines on a page—14.
Letters in a line—14.

Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उपक्रमः—

॥ श्रीहयग्रीवाय नमः ॥

हरिः ओं ।

नमस्कृत्य व्यासं निखिलनिगमान्ताशयशयं
यतिश्रेष्ठाचार्यप्रवरभगवत्पादरचितां ।
यथा प्रज्ञं प्रज्ञां विशदयितु मासङ्ककलुषां
सपर्यापर्यायस्तुतिमविवृतार्थां विवृणुते ॥

इह खलु परमयोगी श्रीमदाचार्यशङ्करभगवत्पादः जीवन्मुक्त्या स्वयं कृतार्थोपि मन्दबुद्धीनां मुमुक्षूणामनुजिघृक्षया वेदान्तसमन्वयसिद्धां परमार्थनिष्ठां सङ्ग्रहेण व्युत्पादयन्नध्यारोपापवादन्यायस्यापादनेन तां दृढीकुर्वन् सपर्यारूपेण तां स्तोतुमुपक्रमते। भूय इत्यादि चतुर्विंशत्या-पद्यैः। तत्रादौ सङ्ग्रहेण वेदान्तसिद्धान्तं व्युत्पादयति भूय इत्यर्थेन भूयश्रेयस्कामिभिरभ्यर्थनयातेनिध्यानाच्चानिश्चयतामत्र जगत्यां। सत्तामात्रानन्दचिदात्मानमनन्तं सोहं तन्त्वामर्चयितुन्न प्रभवामि। भूयश्रेयस्कामिभिरिति समृद्धिवचनम्। चिकीर्षितग्रन्थादौ प्रयुञ्जानः शिष्टाचारतः कर्तव्यं मङ्गळं मन्यते। अत्र जगत्यां श्रेयस्कामिभिर्भूयस्तेभ्यर्थनयातेनिध्यानाच्चानिश्चयतामिति योजना हे आत्मन् अत्र जगत्यां भूमौ अनेन त्रैवर्णिकाधिकारत्वं शास्त्रस्य दर्शयति। यद्वात्र जगत्यामस्मिन् जीवलोके अनेन देवादीनामपि ब्रह्मविद्यायामधिकारं सूचयति।

उपसंहारः—

भुजङ्गप्रयातं पठेद्यस्तु भक्त्या
समाधाय चित्ते भवन्तं मुरारे।
सम्मोहं विहायाशु युष्मत्प्रसादा-
त्समाश्रित्ययोगं व्रजत्यच्युतं त्वां ॥

इहमात्रा वर्णभेदेन द्विविधं वृत्तं तत्र चतसृभिर्मात्राभिर्यत्र गणाः कल्प्यन्ते तैश्च श्लोका नियम्यन्ते तन्मात्रावृत्तं। यथा पथ्यार्यादि यत्र पुनः त्रिभिर्वर्णैर्गणा गण्यन्ते सर्वगुर्मौमुखान्तलौयरावन्त्यगलौसतौ। मग्मध्याद्यौज्भौत्रिलोनोष्टैभवंत्यत्र गणास्त्रिका इति तदाश्रयणेन च श्लोकाविविच्यन्ते तद्वर्णवृत्तं यथा विद्युन्मालादि। यथा चाहुः। मोमो गोगोविद्युन्माला इति तद्वर्णवृत्ते जगत्यां छन्दसि द्वादश द्वादशवर्णपादचतुष्टय चतुर्भिर्यगणैः क्लृप्तपादो वृत्ताविशेषो भुजङ्गप्रयात इत्युच्यते भुजङ्गप्रयातं भवेद्यैश्चतुर्भिरिति लक्ष्यलक्षणात्मके छन्दश्शास्त्र तल्लक्षण-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मुपदिष्टं हे मुरारे मुराख्यस्य प्राग्जोतिषपुरपालकस्यासुरवरस्यारिः मुरारिः सलोकानामिंद्रादिलोकपालानामपि पालकः आत्मनः पापप्रापकस्य देहाद्यात्माभिमानस्य हंता वा मुरारिः तस्य सम्बोधनं तथा यस्तु भवन्तं निर्गुणं सगुणं वा चित्ते निधाय उक्तप्रकारेण ज्ञात्वाध्यात्वा वा भुजङ्गप्रयातं भक्त्या स्नेहबहुमानविश्वासात्मिकया सह पठेत् सः युष्मत्प्रसादात्। अचिरेण तत्कालेन अच्युतं निश्चलं योगं भक्तिज्ञानलक्षणं समाश्रित्य अक्लेशेन लब्ध्वा मोहमात्माविद्यां विहाय त्वत्तोन्यस्स्वयमिति भ्रान्तिं तन्मूलभूतामविद्यां च हित्वा व्रजति स्वात्मतया प्राप्नोति जीवन्नेव मुच्यते ब्रह्मवेद ब्रह्मैव भवतीति श्रुतेः। इति श्रीकृष्णानन्दभगवत्पादशिष्य परमहंसपरिव्राजकश्रीराघवानन्दभगवद्भिरचिता भुजङ्गप्रयातभावदीपिका परिसमाप्ता ॥

श्रीकृष्णाय नमः ॥

प्रतिपाद्यविषयः—

अत्र चतुर्विंशतिपद्यानां शिवविषयकस्तुतिरूपया लघुविवरणोपाख्याया निबध्नाति ॥

No. 73 (965)

साळुवसहस्रनाम

Saluvasahasranama

Author—
Substance—Palm-leaf.
Size—10⅜×1 inches.
Character—Grantha.
Folios—32.
Lines on a page—4.
Letters in a line—10.

Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

शुभमस्तु। श्री हयग्रीवाय नमः। निर्विघ्नमस्तु।
यक्षिणीविषयं।

श्लोकावलिः। ओं। नमो भगवते शरभसाळुवायज्वत् सरसधियरपक्षिगदषद्भहुंफट्स्वाहानिसयपहमहिमाविरशपभताद ॥

कालमृत्युहरिश्चैव सर्वकल्याणवर्धनम्।
तस्य नाम्नां सहस्रस्य ऋषिश्शङ्कर ईरितः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

छन्दप्रकृतिरित्युक्तं देवताशरभेश्वरः ।
द्विचत्वारिंशद्वर्णैः न्यासङ्कुर्यात्षडङ्गकं ॥
ध्यायेद्रक्ताभमिन्द्राद्यैरर्चितं चन्द्रशेखरं ।
तन्मन्त्रं भाषणपरं सर्वलक्षणलक्षितं ॥
सौन्दर्याब्धिसरोजाक्षं सर्वज्ञं साधुसत्कृतं ।
वरदाभयहस्तं च शङ्खनादभयंकरं ॥
सर्वेशं सर्वगं वन्दे सालुवेशं सदा हृदि ।
एवं ध्यात्वा द्विजश्रेष्ठः पठेन्नामसहस्रकं ॥

औंकारमापो ॥ १ ॥ ओङ्कारः ॥ २ ॥ ओषधीशपरायणः ॥ ३ ॥ ओजस्वान् ॥ ४ ॥ ओघसंतुष्टः ॥ ५ ॥ ओमित्यार्णपरायणः ॥ ६ ॥ ओघत्रियार्चितपदो ॥ ७ ॥ औदार्यगुणवारिधिः ॥ ८ ॥ नरनारायणस्सूर्योनळिनायतलोचनः ॥ १० ॥

उपसंहारः—

स्वस्तने नमः । हुंफद् नमः । स्वधाय नमः । स्वाहाय नमः । श्रौषडाय नमः । षट्विषान्नमः । अक्षयश्च स्वभक्तानां अक्षय्यसुखदायकाय नमः ॥
चोरराक्षससंहारि विनियोगाः प्रकीर्तिताः ।
ध्यायेद्रक्ताभमिन्द्राद्यैः अर्चितं चन्द्रशेखरम् ।
तन्मन्त्रं भाषणपरं सर्वलक्षणलक्षितं ।
सौन्दर्याब्धिसरोजाक्षं सर्वज्ञं साधुसत्कृतिम् ।
वरदाभयहस्तं च शंखनादभयङ्करं ।
सर्वेशं सर्वगं वन्दे सालुवेशं सदा हृदि ॥

प्रतिपाद्यविषयः—

ईश्वरविषयकसहस्रनामस्तुतिः पद्यरूपेण उपपाद्यते ।

No. 74 (1563)

उत्कण्ठाभरणम्

Uthkantabharanam

Author—Chidambara.
Substance—Palm-leaf
Size—$14\frac{1}{2}\times1\frac{1}{2}$ inches.
Character—Grantha.
Folios—90.
Lines on a page—8.
Letters in a line—48.

Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ शुभमस्तु ॥

॥ निर्विघ्नमस्तु ॥

उपक्रमः—

ध्यात्वादिनान्ते तु महीसुरेण वाणींनमस्कारपुरस्सरंद्राक् ।
उत्कण्ठभूषाख्याचिदम्बरीय काव्यस्यटीकारुचिराविलिख्यते ॥

॥ श्रीरस्तु ॥

॥ गुरुभ्यो नमः ॥

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिं ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ॥

वाचं वो रचयतु सर्वदान्तरङ्गे गांगेयस्स रसनयोदयान्दधानः ।
सत्याप्तो बुधकुलमौलिबन्धुरोज श्रीरामस्तुत गुरुमाननाब्जहंसः ॥

वाचं—वः—रचयतु सर्वदा—अन्तरङ्गे—गां—गेयः—सः—रसनया—उदयां—दधानः—सत्याप्तः—बुधकुलमौळिबन्धुरः—अजः—श्रीरामः—स्तुतगुरुमाननाब्जहंसः—इति पदविभागः । अस्यार्थः—अजोवोऽन्तरङ्गे वाचं रचयत्विति क्रियायोजना। अजो ब्रह्मा किं विशिष्टः—उत्भूतः अयः शुभावहाविधिः यस्यास्तां गां सरस्वतीं रसनया जिह्वया दधानः। अत एव गेयः स्तुत्यः बुधकुलमौलिषु विद्वत्कुलावतंसेषु बन्धुरः सुन्दरः सत्योनाम लोकः तदाप्तः श्रिया सम्पदा त्रयीरूपयारामः मनोज्ञः। ऋचो यजूंषि सामानि साहि श्रीरमृता सतां इति श्रुतेः स्तुतौ गुरुमाननौ अलघु सत्कारौ अब्जहंसौ यस्य सः तथोक्तः सः अजः वः युष्माकं अन्तरङ्गे हृदि वाचं रचयतु कल्पयतु वासयत्वित्यर्थः अयः शुभावहो विधिः—गौस्वर्गे वृषभे रश्मौ वज्रे हिमकरे पुमान्—स्त्रियं हग्धेनु दिग्बाणभूवाग्वारिषुगौर्मत इति—स्याच्तथ्येशपथे सत्यं लोके नात्रिषु तद्वति। सत्यां कौसलकन्यायामाप्तस्यात्सभ्यलब्धयोः—

बुधस्सूतासुरे सौम्ये सन्तत्याळयोर्गृहे कुलं ।
केशोर्के मकुटे मौळिः बन्धूरस्सुन्दरेपिच ।
अजश्शंभौ विधौ विष्णौ कामे छागे रघोस्सुते ।
रामस्तु मृगभेदःस्याज्जामदग्न्ये हलायुधे ।
राघवे चासितश्वेत मनोज्ञेषु च वाच्यवत् ।
गुरुः पित्रादिकेषु स्यादाचार्ये सुरमन्त्रिणि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दुर्जरालब्धनल्पेषु महत्यपि विशेष्यवत् ।
मानना सत्क्रियाब्जं स्यात्पद्मे ता चन्द्रशङ्खयोः ।
हंसो विहङ्गभेदे स्यादर्के विष्णौ हयान्तरे ।

इति निघण्टवः

उपसंहारः—

तं भीमसेनोऽमहितं तदाहतं सपुण्ड्रदेशेसुहृदङ्गदाश्रितः ।
दुर्योधनं मानवनाथकोतनोऽत्कृतोरुभेदं युधिदुर्दशाननम् ॥

भीमसेनः—उग्रसेनः

सुहृत् । शोभनहृदयः । अङ्गदेन आश्रितः । यद्वा सुहृदङ्गदो येषां-तैः । सुहृदङ्गदैर्वानरैराश्रितः समानवनायकः रामः तदा युधि पुण्ड्र-देशेत्यलिकाप्रदेशे ललाटे आहतं प्रहतं दुष्करं स्वविषयं योधनं यस्य तं दुर्योधनं दुर्दशाननं दुष्टदशाननं तं रावणं कृतोरुभेदं कृतबहुभेदं अतनोत् अनेन एकशतवारं कृतं रावणशिरच्छेदन-मुक्तं भवति । अन्यत्र तदा युधि गदया आश्रितः अलंकृतस्सहित इत्यर्थः । मानवानां मनुष्याणां नायकः स भीमसेनः पुण्ड्रदेशे आहतं प्रहतं अनेन शिरसि पादप्रहारः सूचितो भवति । दुर्दशं दुरवस्थं आननं प्राणनं यस्य तं तथोक्तमहितमसुहृदं शत्रुं दुर्योधनं कृतोरुभेदं कृतऊर्वोर्भेदं यस्य तं अतनोत् । अपरत्र भीमसेनः चण्डसेनः गदेन यादवेन नन्दनेन आश्रितः नवनं स्तव एव आयः यस्य सः तथा मायाः लक्ष्म्याः नवनायकः ब्रह्मा येन सः तथा लक्ष्मीदर्शनेन तत् संदृष्टारं ब्रह्माणं स्तौतीति-भावः । सः कृष्णः तदा युधि दुर्दशं आननं यस्य तं दुष्करं स्वविषयं योधनं यस्य तं हतपुण्ड्रदेशमहितं पूजितं तं पुण्ड्रवासु-देवं असुहृदं शत्रुं कृतोरुभेदं कृतबाहुभेदमतनोत् । कृत्रिम-सारूप्यं पुण्ड्रकं हत्वा अकृत्रिमसारूप्यञ्चकारेत्यर्थः ॥

यं यं वापि स्मरन्भावं त्यजन्त्यन्तेकळेवरं ।
तन्तमेवेति कौन्तेय सदा तद्भावभावितः ॥

इति स्मृतेः अन्ते भगवन्तं स्मरन् पुण्ड्रवासुदेवः तद्रूपोऽभूदिति भावः प्रियां प्रतापान्मुदितांमरुत्सखादयां निजां प्राप्य जयश्रियं ययौ । स्फुरद्विमानस्सहरिस्सहोदरः पुरं सरामो भुविधर्मनन्दनः । अस्यार्थः । प्रतापात् प्रकृष्टतापात् मरुत्सखात् अग्नेरुदिता

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मुत्थितां जयेस्थिता श्रीः यस्यास्तां अयोनिजां अयोनिसंभवां भुवि स्वत उत्पन्नामित्यर्थःप्रियां भार्यां सीतां प्राप्य स्फुरद्धिमानं पुष्पकं यस्य सः स हरिः सवानरः ससोदरः सानुजः भुवि धर्मचापः नन्दनः हर्षकरः यस्य सः रामः पुरं अयोध्यां ययौ। अन्यत्र अयः शुभावहविधिः विमानः विगतमदः सहरिः सकृष्णः ससोदरः सभ्रातृकः सरामः सश्रीकः धर्मनन्दनः धर्मपुत्रः प्रतापात् पौरुषात् मरुत्सखाद्धयस्तरूपकं उदितां निजां नित्यां प्रियां श्रियं प्राप्य स्फुरत्पुरं हस्तिनाख्यं नगरं ययौ।

प्रतिपाद्यविषयः—

एतत्काव्यं चिदंबरनाम्ना कविना प्रतिपद्यं रामायण भारत भागवत परतया त्रिप्रकारेण व्याख्यानं कृतं भवति।

No. 75 (1481)

तारकासुरविजयकाव्यम्

Tarakasuravijayakavyam

Author—Ananthanarayana.
Substance—Palm-leaf.
Size—18 × $1\frac{3}{4}$ inches.
Character—Grantha.
Folios—59.
Lines on a page—8.
Letters in a Line—64.

Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

श्रीमीनाक्षीसुन्दरेश्वराभ्यां नमः ॥ ओं ॥
श्रियं समग्रां तनुतादनत्यया
सदेवदेवो मम भक्तवत्सलः।
पुरा नियुक्तशिरसा सुरापगा-
मुवाहमर्त्येन महेश्वरोपि यः ॥ १ ॥
तुषारगौराभरणं दरस्मितं
शशाङ्कबिंबास्थितामिन्दुशेखरम्।
किमप्युपासे स्फटिकामलस्महः
स्तदग्र्यसारस्वतसंपदाप्तये ॥ २ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नमांसि भूयांसि सतेनभूयसा
महाकविभ्यश्शिरसा करोम्यहं ।
महानुभावाः कवयोपि मां चिरं
दृशानुगृह्णन्तु दयारसार्द्रया ॥ ३ ॥
क्व काव्यमार्गः कविकुञ्जरोचितः
क्व मन्दधीरेष निसर्गतो जनः ।
प्रवर्तयत्येव तथापि मामिह
स्वतो गुरूणामखिलार्थदा दया ॥ ४ ॥
अपश्चिमानां श्रवणं गता सती
विपश्चितां यैव सुधेति गीयते ।
विगीय्यते सैव तदन्यगामिनी
विषस्वरूपेति कवेस्सरस्वती ॥ ५ ॥
कथं कथंचिद्भिरचय्य नीरसं
दुरस्वयं किन्ननवद्यशब्दितम् ।
प्रदर्शयन्तः कतिचिद्विपश्चिते
प्रसह्य लज्जान्दधते न जात्वपि ॥ ६ ॥
कदापि केनापि जगत्त्रये यत्
प्रयोगमर्हत्यपि नैव तत्पदम् ।
प्रयुज्य पृच्छन्ति तदर्थमुद्यता
महाकवीनेव कथं दुराशयाः ॥ ७ ॥
भयोत्तरा दुष्कविवक्त्रदर्शना-
द्द्रवन्ति दूरे कवयो हितैषिणः ।
महोरगस्योद्गिरतोविषानलं
जिजीविषुः कः पुरतो भवेज्जनः ॥ ८ ॥
क्व जीवितव्यं कविभिर्महात्माभिः
बलोक्तिविस्फूर्जथुसाध्वसं विना ।
जगन्ति सर्वाण्यपि तन्मयानि यत्
धिगस्तु चित्रां विधिसृष्टिमीदृशम् ॥ ९ ॥
स्फुटास्फुटज्ञानकणानुषङ्गतः
प्रपद्य मूर्धानिरवग्रहं ग्रहम् ।
श्रुतौ न कुर्वन्ति सुधामयीर्गिरो
मिषेण केनापि विवर्तिता ननु ॥ १० ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जगत्त्रयोन्माथि रसध्वनिस्पृशः
खलास्य गर्ता द्रुहिताः परेशराः ।
गुणानुषङ्गेण विनैव सर्गता
निश्शेषमहो - - - - वेरसून् ॥ ११ ॥

उपसंहारः—

वाग्देवीदयिते क्वचित्क्वचिदपि श्रीवल्लभे पालके
ष्वाशानामपि पाकशासनमुखेष्वानन्दभूम्ना क्वचित् ।
स्कन्दन्नि यासुरपतिन्देवस्तुवत्सूच्चकैः
कामप्यापदशा शशाङ्कशकलोत्तंसः प्रमोदोल्बणाम् ॥

स्तुत्वा नत्वा च देवं हरमचलसुतां तं च वीरं कुमारं
तत्कूकंपानुकंपापुनरुपगमितोदग्रसाम्राज्यलक्ष्मीः ।
प्राप्तं स्वं भद्रपीठं विबुधपरिवृढसेव्यमानस्सुधाशौ-
र्जज्ञे विश्वं विभूत्या परिगतमखिलं शश्वदुन्मेषवत्या ॥ ६३ ॥

चारित्रैः पितरौ शुभैरतितरामानन्दयन् लालना-
न्यैताभ्यां प्रणयातिमेदुरवकृतान्यत्यादरान्निर्विशन् ।
श्रेयांसि स्वपदानुचिन्तनवतां भूयांसि चोत्कूलय-
न्नानन्दास्पदमाविरस्तु जगतां स्कन्दस्सचित्ते मम ॥ ६४ ॥

भक्तथा बद्धामिति स्वभावसुरभीत्यम्लानमित्यादरा-
देतद्वाङ्मयपुष्पदाममहिमया त्वत्पादयोरर्पितम् ।
स्यादेतद्यदि तत्वतोपि च तथा कावास्ति चिन्ता तदा
नैवं चेदपि भक्तवत्सलभवान्दृष्ट्यानुगृह्णान्त्विदम् ॥ ६५ ॥

आवर्णग्रहमाचिरंतनवचो मूर्धन्यतत्वोदयं
साक्षाद्यस्य गुरुः प्रसिद्धमहिमा श्रीनीलकंठाध्वरी ।
रोचन्तान्नु कथं हि तस्य सरसा वाचः कविभ्यः कवे-
रिष्ट्या कापि शिलेव गाढपरुषा रुन्धेन कर्णौ यदि ॥ ६६ ॥

इत्यनन्तनारायणकृतौ तारकासुरविजये
एकोनविंशस्सर्गः.

वन्दारुजनमन्दारस्स्कन्दस्सिन्दूरपाटलः ।
क्रियादमन्दमानन्दमानन्दाद्वैतविग्रहः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीगुरुभ्यो नमः । श्रीस्कन्दाय नमः । श्रीपार्वत्यै नमः । श्री शिवाय नमः ॥ ओं ॥

तरणे करणं पुंसां शरणं प्रणुमो वयम् ।
तरुणारुणसंकाशं करुणाभरणं महः ॥ हरिः ओं ॥

समाप्तं तारकासुरविजयाख्यं काव्यम् .

प्रतिपाद्यविषयः—

एकोनविंशतिसर्गपरिमितोयं ग्रन्थः तत्र—

(१) सर्गे हिमगिरिवर्णनं हिमवन्मेनयोर्विवाहः ।

(२) सर्गे पार्वतीजननम् ।

(३) सर्गे पार्वत्याः सौन्दर्यवर्णनम् ।

(४) सर्गे अतिसौन्दर्यशालिनी पार्वती कस्मै प्रदेयेति हिमवतो चिन्ता एवंरीत्या चिन्ताकुलस्य हिमवतस्समीपं प्रति नारदागमनं ततः पार्वती ईश्वरस्यैव भार्या भविष्यति तदर्थं चिन्ता न कार्येति नारदोक्तिः। ततः नारदेन ब्रह्मसभां प्रति गमनम् ।

(५) सर्गे पार्वतीसहितस्य हिमवतः ईश्वरस्याश्रमं प्रति गमनं। तत्र महादेवदर्शनम् । परिचर्यार्थं तस्य समीपे पार्वत्याः स्थापनम् ।

(६) सर्गे इन्द्रादिसकलदेवैः ब्रह्मसमीपे तारकासुरकृतपीडानिर्वेदनं । समस्तदेवानां हरतनयेन तारकासुरवधो भविष्यतीति ब्रह्माश्वासनम् ।

(७) सर्गे तपसि स्थितस्य ईश्वरस्य तपोभंगार्थं ब्रह्मादिभिः मन्मथप्रेषणम् । ईश्वरं प्रति मन्मथेन बाणप्रयोगः । तेन रुष्टेन ईश्वरेण फालाग्निना मन्मथदहनम् । ततः पार्वतीमपि विहाय ईश्वरतिरोधानम् ।

(८) सर्गे रतीदेव्याः विलापः ।

(९) सर्गे पार्वत्या गृहं प्रत्यागमनं। पार्वत्याः विरहतापः ।तच्छान्त्यै मेनया उपचारः । ततः ईश्वरं प्रति पार्वतीतपश्चरणम् ।

(१०) सर्गे गिरजाविवाहार्थं ईश्वरेण हिमगिरिं प्रति सप्तर्षीणां प्रेषणं । ततः विवाहनिष्कर्षः । इन्द्रादिसकलदेवैस्सह ईश्वरस्य हिमगिरिगमनं । विवाहसन्नाहः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(११) सर्गे पार्वतीपरमेश्वरविवाहवर्णनम् ।
(१२) सर्गे पार्वतीपरमेश्वरविहारवर्णनम् ।
(१३) सर्गे षण्मुखजननं तस्य यौव्वनप्रादुर्भावः । तस्य सैन्याधिकार अभिषेकः ।
(१४) सर्गे राक्षसपत्तने दुर्निमित्तदर्शनं शुक्राचार्यस्तादृशदुर्निमित्तं दृष्ट्वाराक्षसेश्वरवधनिश्चयं करोति । ततः तारकासुरसमीपं गत्वा तद्वृत्तान्तनिवेदनम् । तच्छुत्वा तारकेण समाधानवचनम् ।
(१५) सर्गे शरदृतुवर्णनम् ।
(१६) सर्गे कुमारस्वामिना तारकासुरवधाय समस्तदेवसैन्येन साकं राक्षसपुरप्रवेशः ।
(१७) सर्गे सुरासुरयुद्धवर्णनं तारकासुरवधवर्णनं च ।
(१८) सर्गे समस्तदेवसैनिकानां रात्रौ सन्तोषप्रदर्शनपूर्वकं विहारवर्णनम् ।
(१९) कुमारस्वामिना सकलसैन्येन साकं हिमगिरिं प्रत्यागमनवर्णनमित्यादीनि वर्णितानि भवन्ति ।

No. 76 (190)

पदरेणुकासहस्रटीका

Padarenukasahasrateeka

Author—Sudarsanacharya.
Substance—Palm-leaf.
Size—14 × 1¾ inches.
Character—Andhra.
Folios—264.
Lines on a page—5.
Letters in a line—48.

Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Incomplete.

उपक्रमः—

श्रीरस्तु । शुभमस्तु
श्रीमते रामानुजाय नमः। शुभमस्तु ।

श्रीपादाब्जरजोविष्णोस्तनोत्वाश्रितमङ्गळम् ।
अनन्यकामा यत्प्राप्तुं तेपे मंगळदेवता ॥

शाभ्यां च नेतारावित सूत्रवाक्यार्थः। कस्मिन् भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति एकविज्ञानेन सर्वविज्ञानप्रश्ने सर्वविद्याप्रतिष्ठात्वं सर्व

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विद्याश्रयत्वम् । परब्रह्मविषयाविद्यापराविद्येति पूर्ववाक्ये ज्ञातव्ये ब्रह्मणि कृत्स्नज्ञातव्यान्तर्भावाद्ब्रह्मज्ञाने कृत्स्नविषयज्ञानान्यन्तर्भूतानीत्यर्थ इति सुदर्शनाचार्यैरनुगृहीतं । तदव्ययमिति तद्ब्रह्मात्मकवस्तुपक्षशुभावहविषय-शून्यमित्यर्थात् गाधा । एकविज्ञानेन सर्वविज्ञानविशेषणात् प्रधानभेदः । अक्षरात्परतः पर इति चेतनभेदव्यपदेशश्च । हे आश्रित नारस्यायनं हि नारायणः । तत्र आश्रितशब्देन नारशब्दार्थः पक्षिविशेषो गृह्यते विष्णोः । कुरंगनगरीस्थितस्य । श्रीपादाब्जयोर्वर्तमानम् । रजः । मङ्गळम् । तनोतु । प्रार्थनायां लोट् । इदानीं भगवत्प्राप्तिविरहजनितावस्था मङ्गळप्रार्थनया प्रतीयते । आश्रितशब्देन स्वस्यैव सर्वस्यापि भगवदाश्रितत्वं स्वरूपमिति निश्चित्य स्वयमिवायमपि वर्तत इति संबोधनेन ज्ञायते । भगवत्पादां-भोजस्य निरतिशयभोग्यतामाह । यत् । विष्णुश्रीपादाब्जरजः । प्राप्तुम् । एतेन तद्दर्शनं पूर्वं लब्धमिति गम्यते । तदाह अनन्यकामा । अन्येषा-मभोग्यत्वात् । मंगळदेवता । मंगळानां धीराणां च धियश्च-देवता ॥

तेपे । तपश्चक्रे इत्यनेन इदानीं लक्ष्म्याः पादरेणुसेवासिद्धेति भावः । एतेन संबोधिकाया भगवद्वल्लभाविशेषरूपाया नायिकायाः पादरेणुसंभू-तस्य निरतिशयमङ्गळस्य मङ्गळानां च मङ्गळमित्युक्तस्य रेणुकृपया प्राप्यत्वं च सकलाश्रितविषये तत्प्राप्तिसाधारण्यं च ध्वन्यते । विज्ञातं अव्ययमित्यत्र विशब्देन पक्ष्यपि गृह्यते । कस्मिन् वस्तु विज्ञाते ॥

अयश्शुभावहो विधिः ॥

उपसंहारः—

पुण्येनैवफलोन्मुखेन निखिला रक्षन्ति देवाश्रितं
त्वन्नैतत्करुणाकरोषि करुणामात्रेण पास्यात्मनः ।
अन्येषां खलु चक्षुषां परमहस्सङ्गेन कार्यान्विय
स्तद्वद्विघ्नपचक्षुषः किमु जपेच्छेषाद्रिराट्पद्रजः ॥

पुण्येनेति । एतेन सर्व इति सूत्रपदार्थः । ब्रह्म वा इदमग्र आसीदेक-मेव । अत्यसृजत क्षत्रम् । आत्मैवेदमग्र आसीत्पुरुषविदः । ततोहन्नामा-भवत् सोबिभेत्तस्मादेकाकी बिभेति । नैवेह किंचनाग्र आसीन्मृत्युनैवेद-मावृत आसीदशनायाहिमृत्युस्तन्मनोकुरुत । सोर्चन् । किं तदसीत्त-स्मै सहोवाच न सन्नासन्नसदसदिति तस्मात्तमस्संजायते । आसा-वादित्यो ब्रह्म । सूर्य आत्मा जगतः । प्रजाकामोह वै प्रजापतिस्स तपोतप्यत तपसा ब्रह्मचर्येण श्रद्धया विद्ययात्मानमन्विष्यादित्यमभिजयते । एत-स्मान्न पुनरावर्तन्ते । हिरण्यगर्भस्समवर्तताग्रे । अद्भ्यस्संभूतो हिरण्य-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गर्भः । तदापस्स प्रजापतिः । यो देवनां प्रथमं पुरस्ताद्विश्वाधिकोरुद्रो महर्षिः । यः परस्स महेश्वरः विश्वाधिको रुद्रो महर्षिः । हिरण्यगर्भं जनयामास पूर्वम् । अनपहतपाप्माहमास्मि । ललाटात्क्रोधजो रुद्रः । जज्ञे अग्रस्त्वेष नृणः । कुमारो जायतसोदीत्तं प्रजापतिरब्रवीदित्यादि । वरं वृणे अहमेव पशूनामधिपतिरसानीति ।यदा तमस्तन्नदिवा न रात्रिः । देत्मशक्ति प्रेरितारं च मत्वा व्यक्ताव्यक्तं हरते विश्वमीशः । नान्यो हेतुर्विद्यत ईशनायेति योगार्थपरत्वाच्छदब्रह्मरुद्रशब्दयोः कार्यवाचित्ववत् चतुर्मुखाज्जननं रुद्रस्यैव नारायणादिशब्दवाच्ये दर्शनाभावात्केवलकारणत्वमेव एतेनेति शब्दार्थः । प्रथमाध्यायोक्तचतुस्त्रिंशदधिकरणसमर्थितकारणत्वेन सर्वे कारणवाचिनो वेदान्ता नारायणपरा एवेति सूत्रार्थः । तदेवाह । फलोन्मुखेन पुण्येनैव । फलं प्रति कारणत्वेन निश्चितभगवत्प्रीतिरूपकर्मणैव निखिला देवाः श्रितं स्वाश्रितम् । रक्षति । तेषां रक्षकत्वभ्रान्तिरिति भावः । अन्तर्यामिणो भगवतः प्रीतिरूपत्वात्कर्मणः भगवानेव फलप्रद इति तेषान्न स्मृतिर्नित्येति भावः । हे शेषाद्रिराट्पच्छब्देन ध्यानहेतुशुभाश्रयविग्रहस्वरूपमुक्तम् । त्वम् । एतत् । भगवत्प्रीतिजनकत्वेनानुष्ठितं कर्मैव न करणे करोषि । सादनं करोषि । तस्याहङ्कारदुष्टत्वेन कैवल्यादिहेतुत्वात् । आतमनः । चेतनान् । ब्रह्मरुद्रेन्द्राद्यस्मत्पिपीलिकापर्यन्तान् करुणामात्रेण । तदैक्षत हन्ताहमिमा इत्याद्युक्तपुण्डरीकाय नेत्रपर्यन्तपरिपूर्णजगन्निर्माणोन्मुखकृपयैव जगत्समष्टिनिर्माणं ज्ञानप्रदानं च कृपामात्रकार्यम् । चेतनपुण्यपापयोरेकैकस्य दुष्टफलप्रदत्वेन जगत्सङ्घातकारणत्वासंभवात्करुणैव तत्र हेतुः । पासि । यथार्थं रक्षति । अत्र भ्रान्तेर्नावकाश इति भावः । पासीति । स्वदेहं मानलज्जाभयादिकं परित्यज्य केवलपङ्कजादिषु दर्शनमात्रपारवश्येन ताण्डवगानचलनविकारावलोकनपरिभ्रमणपर्यन्तनिरातिशयो—ल्लासपर्यन्तप्राप्तिरूपपालनं करोषीति भावः । स्वस्य सादननिरपेक्षत्वे दृष्टान्तमाह । अन्येषां लोकचक्षुर्भिन्नानाम् । चक्षुषां पशुमनुष्यादिनेत्राणाम् । परस्य स्वस्मादन्यस्य महसः आलोकस्य संगेन संयोगेन कार्यान्वयः । कर्तुं योग्यस्य दर्शनस्य ।

विराड्विग्रह चक्षुषसूर्यात्मकस्य । तद्वत् । दर्शने स्वान्यतेजोपेक्षा भवेत्किमु । दृष्टिस्तेजोरूपेणैव विराट्पुरुषस्य विद्यांभोजरवेरित्यादि सदानन्दे भवत्पञ्चमः । एतेन सर्वं इति सूत्रतात्पर्यार्थः कारणं तु ध्येयश्शंभुराकाशमध्ये ध्येयः । कारणं शंभुर्ध्येय इत्यर्थः । न चास्य कश्चेज्जनिता नराधिपः । कर्माधीनोत्पत्तिशून्यत्वम् । अजायामानो बहुधा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रीः ॥

श्रीशारीरकाराधनम्

(तदाराधन-तत्सुप्रभातनामावलिभिः संवलितम्)

श्रीरामानुज सिद्धान्त विजयध्वजादि बिरुदपरिमण्डितकापिस्थल
श्रीदेशिकाचार्य गुरुवर गुरुतर करुणासमधिगता-
ध्यात्मशास्त्रवैशद्येन विद्वद्वरेण
श्रीमदनन्ताचार्येण
विरचितम्

श्रीमहीशूरपुरमहाराज संस्कृतमहापाठशालायां वैखानसागम
प्रधानोपाध्यायेन व्याकरण-वेदान्त-विदुषा
चक्रवर्ति तिरुमलाचार्येण
प्रत्यवेक्षितम्

मैसूरु
राजकीय शाखामुद्रालये सम्मुद्रितं च विजयतेतराम्
१९४८

SAN. M. III & IV.　　8

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रबन्धसमर्पणम्

आत्रेयवङ्गीशवंशश्री वेङ्कटाचार्यसूनुना ।
श्रीरामानुजसिद्धान्तजैत्रकेतोर्महात्मनः ॥ १ ॥

कलाप्रपूर्णाविरुदभूषितस्य सुधीमणेः ।
महामहोपाध्यायश्रीदेशिकाभिधसद्गुरोः ॥ २ ॥

पदाम्बुरुहभृङ्गेणानन्तदासेन धीमताम् ।
अमत्सराणां महतां मनोनन्दनहेतवे ॥ ३ ॥

शारीरकाधिकरणगुणैराराधनं कृतम् ।
अनेन स गुरुर्देवः प्रीयतामच्युतो विभुः ॥ ४ ॥

आशंसनम्

शुभं भूयात्सर्वेषाम्

ग्रन्थप्रणयनकालः श्रीशालिवाहनशकः १८६५ चित्रभानुवत्सरः ज्येष्ठमासः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ग्रन्थकृदुदन्तः

महतां पदाब्जरेणुः

वङ्गीशवंशालङ्कार - श्रीमदहोबिलमठास्थानीषष्ठास्थाननिर्वाह-काहोबिलगुहाविहारि नवनृसिंहमूर्तिनित्याराधक षष्ठपराङ्कुशमहा-देशिकवंशजननधन्यः।

किंगेहपुरवास्तव्य महासुन्यन्वर्थनामवेङ्कट वीरराघवगुरु-चरणन्यस्तात्मभरः।

श्रीलक्ष्मीनृसिंहदिव्यपादुकासेवक श्रीशठकोपरामानुजसंय-मीन्द्रसमधिगतपञ्चसंस्कारः। तदव्यवहितान्तेवासि लक्ष्मीनर-सिंहाराधनमूर्धाभिषिक्त श्री वीरराघवशठकोपयतीन्द्रमहादेशिक-समधिगत द्रविडवेदान्तगीताभाष्यादिग्रन्थजातः। कुदृष्टिकुहना-मुखनिपतत्परब्रह्मकरावलम्बदानदक्षघण्टावतारापरावतारकपि - स्थलाभिजनकौशिकदेशिकार्यकृपासमधिगत शारीरक सूत्रभाष्य-रहस्यत्रयसारादितत्त्वार्थोऽनन्तदासः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रीः ॥

उपोद्घातः

नित्यां जडां परार्थां प्रकृतिमधिष्ठाय सृजति यो विश्वम् ।
निजसंकल्पानुगुणं सोऽव्याद्ध्याहाननः परस्तमसः ॥

सहृदया विद्वदवतंसाः,

इदमतिरोहितं निश्चप्रचं च समेषां हेयोपादेयविवेकमांसलधियां सुधियाम् । यदमितोदारशुभगुणसागरपरमपुरुषसमनुप्रवेशसमधिगतविचित्र चराचरवस्तुजालरचन कौशलविरिञ्चिवानितोच्चावचविभ्रमपरिमण्डितेऽत्र वाङ्मये जगति सज्जनहृदयभाजनो जैमिनीय न्याय-निगम शब्दतन्त्र-ज्योतिस्तन्त्र-स्मृति-पुराणधर्मसूत्रादि वर्तिकाविभास्वरो भगवद्बादरायणमुनिवरकृतब्रह्मसूत्रतैलसंधुक्षितः कौतस्कुतमतव्रातजञ्झामारुतविधूनन पटुतरश्रीमद्भगवन्नाथ यामुन–रामानुज–मुनिमणिनिगमाञ्चलगुरुवरप्रबन्ध -रचितरक्षणाकम्पनः सद्गुरुकरुणोत्तम्भितब्रह्मबोधनिरुपमप्रकाशो भवान्धतमसनिरासकः परां काष्ठामधिरूढः सदाध्यात्मदीपः समुल्लसतीति ॥

लोके स्वमहिम्ना यथोत्तरमध्यात्मवित्तम एव सर्वानप्यतिशेते । तदाह भगवान्मनुः—

भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः ।
बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः ॥
ब्राह्मणेषु च विद्वांसो विद्वत्सु कृतबुद्धयः ।
कृतबुद्धिषु कर्तारः कर्तृषु ब्रह्मवादिनः ॥ इति ॥

अतो ब्रह्मावबोध एव परं निश्श्रेयससाधनम् । अयमेव ज्ञानयज्ञ इति कथ्यते । असावेवान्ययज्ञाच्छ्रेयान् । तदुक्तं भगवता—श्रेयान् द्रव्यमयाद्यज्ञाज् ज्ञानयज्ञः परंतप—इति ।

इदमत्र सिद्धं सर्वाराधनात्प्रशस्ततमं भगवतः पुरुषोत्तमस्य वाचनिकाराधनमिति । यदुक्तं विष्णोरर्चा सर्वदेवार्चा भवतीति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अमुमर्थं मनसि निदधानो ब्रह्मविदुत्तमः श्रीमाननन्तार्यसूरिः शारीरकैः षट्पञ्चाशदुत्तरशत १५६ मितैरधिकरणैर्भगवन्तमभिष्टोतुमुपचक्रमे ।

सुधीमणिरयं काञ्चीपुरोपान्तिमः श्रीवङ्गीश्वरवंशजः श्रीवेङ्कटाचार्यसूरिसुतः कलाप्रपूर्णादिबिरुदपारिकर्मितकपिस्थल श्रीदेशिकार्यकृपात्तश्रीभाष्यादितत्वः । श्रीवेङ्कटवीरराघवमुनिगुरुचरणविन्यस्तात्मभरः श्रीमदहोबिलमठास्थानमूर्धाभिषिक्त श्रीशठकोपरामानुजसंयमीन्द्रलब्धचक्राङ्कस्तादृशयतीन्द्रच्छात्र श्रीवीरराघवशठकोपयतीशाधिगतद्रविडवेदान्तादि ग्रन्थजालश्चेति ग्रन्थान्तिमलेखात्स्पष्टमवगम्येत ।

महाभागोऽयं शररसवसुभू १८६५ मिते शालिवाहशके चित्रभानुहायने ज्येष्ठे मासे सभक्तिप्रकर्षं विनिर्ममे शारीरकसुप्रभातं शारीरकाराधनं शारीरकनामावलिश्चेति रम्यतरं ग्रन्थत्रितयम् ।

तत्र प्रथमद्वितीययोः षष्ट्युत्तरशतं १६० पद्यानि तृतीये तु सत्रिसप्ततिशत १७३ नामानि च संदृश्यन्ते । प्रायोऽत्र ग्रन्थद्वितये संलक्ष्यन्ते मञ्जुभाषिणी वृत्तानि । तादृग्वृत्तैर्ललितया कवनशैल्या सुबोधमधिकरणार्थसंग्रन्थनं भृशं धिनोति सचेतसां चेतांसि । वस्तुतो ग्रन्थत्रितयं मनुवत्प्रत्यहमनुसन्धानार्हमित्यत्र न स्तोकमात्रोऽपि सन्देहः ।

प्रबन्धोऽयं व्युत्पित्सूनामुपकाराय महते कल्पत इति प्रतीमः एतद्ग्रन्थार्थपरिशीलनेन प्रमोदते मे चेत इति सर्वमनवद्यम् ।

इति सज्जनवशंवदः,

आस्थानमहाविद्वान् चक्रवर्ति तिरुमलाचार्यः.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रीः ॥

श्रीलक्ष्मीहयवदनपरब्रह्मणे नमः

श्रीभास्करीयगोलयन्त्रविषयव्यावर्णनम्

अथ मङ्गलाचरणम्

धामनि परोरजसि च त्रयीमये तेजसि त्रयीशिखरे।
मुनिजनदहराकाशे कृतनिलयः पातु मां तुरङ्गास्यः ॥ १ ॥
वेदविलोचनमवनौ त्रिस्कन्धं ज्यौतिषं हि यदुपज्ञम् ।
स जयति मरीचिमाली लक्ष्मीधाम्नो निकेतनं भगवान् ॥ २ ॥

अथ गुर्वनुसंधानम्

भातु कविज्योतिर्वित्पण्डितरत्नप्रथः सदा हृदये ।
मम पूर्वजो गुरुर्मणिर्गोपालार्यः कुशाग्रसमधिषणः ॥ ३ ॥

अथ प्रतिज्ञा

महिशूरनृपतिसंस्कृतवाणीप्रासादपाठशालीयम् ।
श्रीभास्करार्यगणकप्रकाण्डरचितं च गोलयन्त्रमसौ ॥ ४ ॥
व्याख्याति शेषसूरिस्तादशयन्त्रप्रकाशकः स्पष्टम् ।

अथ ग्रन्थारम्भः

अयि गोलविदः सहृदयाः—विदितमेवेदं भवतां—यद्गणकमणि-श्रीमन्महेश्वरसुतेन श्रीभास्करार्येण निजे गोले गोलबन्धाधिकारे स्पष्टमभ्यधायि गोलबन्धक्रमस्तदनुरोधेनान्यूनातिरिक्तं खगुणनन्देन्दु (१९३०) मिते क्रिस्ताब्दे निरमायीदं गोलयन्त्रं चेति ।

साम्प्रतं तत्र विद्योतमानाः सर्वेऽपि विषया निरूप्यन्ते। तथाहि। यन्त्रेऽत्र भूगोलः खगोलः दृग्गोलः भगोलश्चेति रीतिमयं गोलचतुष्टय-मास्ते । तच्च तदुभयतः स्थितयोरयोमययोर्मध्ये दक्षिणोत्तरयोः पलांशान्तरे नतोन्नतरन्ध्रयोः स्थिरमवस्थितयोरधोलोहपट्टिकाद्वये-नोर्ध्वमयःफलकेन च संसक्तयोराधारयष्ट्योः प्रोतायामक्षलवैर्द्वादशभिः क्षितिजादुत्तरस्यां दिश्युन्नतायां तैरेव दक्षिणस्यां नतायां चाधाराय-शलाकायां याम्योत्तरं स्यूतं नानावर्णाङ्कितं चास्ते।

यत्र चतसृषु दिक्षु गगनतलमवनिसंसक्तमिव दृश्यते तत् क्षितिजम्। सौम्यात्तस्मादुदग्ध्रुवो यैरंशैरुन्नतो लक्ष्यते त एवाक्षांशाः । यद्वा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दक्षिणक्षितिजाद्दक्षिणध्रुवो यैर्लवैर्नतो भवति त एवाक्षलवाः। स च याम्यध्रुवो न दृश्यते भूव्यासार्धान्तरितैरस्माभिः। इदमत्रावगन्तव्यम्। यथा शकटचक्रयोर्गमनाय तन्नाभिमध्यसुषिरयोः प्रोता लोहशलाकिका-क्षसंज्ञिका तथा सधरणिखगगोलस्य भगोलस्य भ्रमणाय ध्रुवसंज्ञयोस्त-दन्ततारयोर्मध्ये काचन शलाका प्रोतेति बुध्या परिकल्प्यते। स एवाक्षः। तदग्रे एव ध्रुवौ भवतः। तौ भूगोलवशान्नतोन्नतौ स्याताम्। यथा यथा कश्चन पुमानुदग्ध्रुवं प्रति याति तथा तथा दक्षिणतो भपञ्जरं नतमुत्तरध्रुवमुन्नतं च पश्यति। अतः क्षितिजध्रुवयोरन्तरमक्षांशा इति सुष्ठूक्तम्।

तदाह गोले भुवनकोशे श्रीभास्करः—

उदग्दिशं याति यथा यथा नर-
स्तथा तथा खान्नतमृक्षमण्डलम्।
उदग्ध्रुवं पश्यति चोन्नतं क्षिते-
स्तदन्तरे योजनजाः पलांशकाः॥ इति॥

निर्दिष्टगोलानामवस्थानक्रमस्त्वेवं बोध्यः। सर्वेभ्यो बहिर्भगोल-स्तदन्तर्दृग्गोलस्तदन्तः खगोलस्तदन्तर्भूगोलश्चेति। तत्र त्रयोऽपि गोला धरागोलमभितो दृश्यन्ते।

तत्रादौ भूगोलविचारः

अस्माभिरधिष्ठितेयं भूर्गोलाकारा निराधारा स्थिरा च वियति स्थितेति परमतनिरसनपूर्वकं बहुभिर्युक्तिभिर्निरणायि प्राच्यैर्ज्योति-र्विद्भिः। तन्निर्णयौपयिकयुक्तिक्रमस्त्वेवम्। तत्र भूमेर्गोलाकारत्वसमर्थ-नाय तत्समतानिराकरणे काश्चन युक्तयः।

१. यदि भूः पुराणोक्तविधया मुकुरवत्समाना तर्ह्युदग्ध्रुवस्थल-मधिवसद्भिर्देवैरिवास्मदादिभिः सदा मासषट्कं कथं न दृश्येत भुवः सुदूरं केनाप्यतिरोहितो वियति परिभ्रमन् भगवानस्वरमणिः।

२. कथं न लक्ष्येत सौम्यध्रुव इव याम्योऽपि ध्रुवः।

३. कथमवलोक्येताधित्यकामासीनैर्निरीक्षकैरवनिसंसक्तमिवान्त-रिक्षम्।

४. कथं वर्तुलं छिद्येत शशिग्रहणे तद्बिम्बं भूप्रभया।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

५. कथं वा समालक्ष्येरन्नुदधौ दूरतः शनैः शनैः समीपमापतन्त्या नावः क्रमादूर्ध्वमध्याधोभागाः। किन्तु ते युगपदेव दृश्येरन्मनुजैर्भूसमतायाम्। न तथा ते विलोक्यन्ते भूमिष्ठैः।

६. कथमुत्पद्येत देशविशेषेषु विपर्ययेण प्रत्यक्षसिद्धो दिननिशोभेदः। अपि तु सर्वत्रापि देशे यौगपद्येन स्यादहर्निशयोः संभवः। कथं वा प्रतिदेशं दिनरजनिमानयोर्व्यत्ययः। इति ॥

अत्राक्षेपसमाधाने

ननु भुवः सर्वत्र समत्वावभासनात्कथं तस्या गोलाकारत्वमिति चेदुच्यते। भूपरिधिशतांशस्यैवादर्शसमानाकारतया मेदिन्या महीयस्तया तत्पृष्ठमुपेयुषो नरस्यात्पीयस्तया च तस्य सर्वतः समेव भूः प्रतिभाति। न वस्तुतः सा सर्वत्र मुकुरोदराकारा। गोलपरिधिशतांश एवादर्शाकार इति गाणितिकानां राद्धान्तः। तदाह गोले भुवनकोशे श्रीमान् भास्करः।

> समो यतः स्यात्परिधेः शतांशः
> पृथ्वी च पृथ्वी नितरां तनीयान्।
> नरश्च तत्पृष्ठगतस्य कृत्स्ना
> समेव तस्य प्रतिभात्यतः सा ॥ इति ॥

तस्माद्वसुधा न सर्वत्र समा परन्तु कन्दुकवद्वृत्तैव ॥ इति ॥

धरणेर्निराधारत्वस्थिरत्वयोर्दृढीकरणाय तस्याः साधारत्वभ्रमणयोर्निरसने संक्षिप्ताः काश्चन युक्तयः कथ्यन्ते।

१. वसुमत्याः पुराणमतावलम्बनेन कुलशैलदिङ्मतङ्गजशेषादीन धारकत्वाङ्गीकरणे धरणेरूर्ध्वाधरं प्रवहानिलेन प्रत्यहं घटीषष्ट्या परिभ्रमतः सग्रहस्य भचक्रस्याधारे स्खलनात्तस्य भ्रमणं कदापि नोत्पद्येत।

२. भूनिराधारत्वाभिव्यञ्जकेन प्रात्यक्षिकेण भगोलभ्रमेणैव दिननिशायनादिसंभवः। अन्यथा सर्वा अपि गोलप्रक्रिया व्याकुप्येयुः।

३. मेरुवशेन दिनरजनीसंभववादिनां मते मेरोः सर्वेषामुदीच्यतयोत्तरत एवास्माकं सदा भगवान् भास्करो दृश्यःस्यात्। कथमस्माभिः स विलोक्यते दक्षिणतोऽपि। तस्माद्ध्रुवमभित एव भग्रहणां भ्रमणमुपपन्नं भवेत्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

४. किंच धराधारकाणां तेषां कुलाचलादीनां मिथो धारकवस्त्वन्तरसापेक्षतया तस्यान्यस्तस्याप्यपरो धर्ता चेति दुर्वारो ह्यनवस्थाप्रसङ्गः। तादृशानवस्थाया निवारणायान्तिमे धर्तरि वस्तुनि नैसर्गिकी धारणाशक्तिर्यद्यभ्युपगम्येत तदा लाघवात् प्रथममेव सा परिकल्प्यतां भगवदमृतांशुमौलिवपुषो महामहिमाया वसुधायाः। अतो भूर्निराधारेति सिध्यति।

अथ महीनैश्चल्यवादः

वर्तुलेयं भूर्ब्रह्मणा वितीर्णया धारणशक्त्यैव दिवि तिष्ठतीति सूर्यसिद्धान्तः। अयस्कान्तस्तम्भयोरन्तरे वर्तमानो लोहपिण्ड इव क्षोणीगोलो भपञ्जरमध्यगस्तदाकर्षणमहिम्नानिश्चलोऽवतिष्ठत इति श्रीवराहमिहिरः।

अशनिहतद्रुमोत्पन्नो भेषजविशेषलिप्तो नभसि विनिहितः शङ्कुरिव धरागोलः स्थिरोऽस्तीति लल्लः।

तथा च तद्वाक्यं धीवृद्धिदे मिथ्याज्ञानाध्याये (श्लो ४५)—

तटिदाहतवृक्षकीलकः
किल संयोगमवाप्य भेषजैः।
गगने निहितोऽवतिष्ठते
रसमौल्यादिविधेर्यथाम्बुजम् ॥ इति ॥

वाय्वनिलयोर्नैसर्गिकयोश्चलत्वदाहकत्वगुणयोरिव भुवो निश्चलत्वगुणस्य स्वाभाविकतया वस्तुशक्तेर्विचित्रतया च सा स्वशक्त्यैव वियति तिष्ठतीति श्रीभास्करः।

एतेन रसानैश्चल्यं सर्वसंमतमिति सिद्धम् ॥

अथ भूभ्रमवादसमयः

अत्र केचित् क्षोणीस्थैर्यमनङ्गीकुर्वाणा भूमेः पूर्वाभिमुखं भ्रमं ब्रुवन्ति। यथाक्रमं वसुनन्दाब्धि (४९७) मिते शराभ्रेषु (५०५) समे च क्रिस्तशके वर्तमानाभ्यां श्रीलल्लवराहमिहिराभ्यां धराभ्रमस्य बहुधा निरस्ततया तयोः समयाभ्यां पूर्वमेव भूभ्रमवादोऽवर्ततेति स्फुटमवगम्यते।

अथ भूभ्रमवादस्य वृद्धार्यभटानभिमतत्वसमर्थनम्

नन्दाङ्काब्धि (४९९) समे क्रिस्ताब्दे स्थितः श्रीमानार्यभटो महीभ्रममेवाभिप्रैतीति तत इतो विसृमरोऽयं प्रवादः तत्र किञ्चिदुच्यते।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आर्यभटेन युगे पूर्वगतया व्रजतामर्कादीनां भगणकथनावसरे क्षमाया अपि खखशराद्रि गुणाकृतिवसुवाणभू (१५८२२३७५००) मिता भगणा उक्ताः। किञ्चैवं न्यगाद्यार्यभटीये गोलपादे—

अनुलोमगतिर्नौस्स्थः पश्यत्यचलं विलोमगं यद्वत्।
अचलानि भानि तद्वत्समपश्चिमगानि लङ्कायाम्॥

इति पद्ये (१९) यथा प्रतीचीं गच्छन् पुमानचलं तरुशैलादिकं प्राचीं गच्छदिव पश्यति तथा लङ्कायां क्षितिजसंसक्तयाम्योत्तरध्रुवद्वयोपरिगशलाकाग्रप्रोतस्य भचक्रस्य जलयन्त्रवन्मस्तकोपरि परिभ्रमणात्तदधिष्ठितानि भानि स्थिराण्यपि भूमिष्ठवस्तूनि प्राच्यां व्रजन्तीव वीक्षन्ते। एवं भचक्रस्य स्वस्वविक्षेपमितशलाकाग्रप्रोतानां स्वतो गतिरहितानामचेतनानां भानां चेतनधर्मरूपवीक्षणकर्तृत्वारोपणपुरस्सरं मिथ्याज्ञानेन प्रत्यङ्मुखभ्रमोऽङ्गीकृतः। इत्थं मही प्राङ्मुखगतिजभगण भवलयप्रत्यङ्मुखभ्रमणयोरभिधानात् स्थिराया अपि धरणेः पूर्वाभिमुखीगतिरार्यभटाभिमतेति प्रतीयते। नैतत्तथ्यं भवत्येतदीयपूर्वोत्तरग्रन्थपरिशीलनेन। तथाहि।

अनेनैवाचार्येणोत्तरत्र गोलपादे—

उदयास्तमयनिमित्तं नित्यं प्रवहेण वायुना क्षिप्तः।
लङ्कासमपश्चिमगो भपञ्जरः सग्रहो भ्रमति॥

इति श्लोके (१०) ग्रहभानां दैनिकोदयास्तमययोः सिद्धये प्रवहानिलेन वस्तुतः सखगभगोलस्य प्रत्यङ्मुखभ्रमणमभिहितम्।

अपि चानेनाभाणि पूर्वत्र कालक्रियापादे—

भानामधःशनैश्चरसुरगुरुभौमार्कशुक्रबुधचन्द्राः।
तेषामधश्च भूमिर्मेधीभूता खमध्यस्था॥

इति पद्ये (२५) सौम्यध्रुवस्थले तैलिकयन्त्रवद्ध्रुवमभितोभ्रमतामवरोहतः शन्यादिचन्द्रान्तानां खचराणामधो भूमिर्नभोमध्ये मेधिरिव तिष्ठतीति। मेधिर्नाम धान्यमर्दकवृषभवन्धोपयिकः खलमध्ये निश्चलं निखातः स्थूलशङ्कुः।

एवमार्यभटीये परमार्थतो यथाक्रमं भूगोलभगोलयोः स्थैर्यभ्रमयोः स्पष्टमभिधानात् सर्वात्मना धरास्थैर्यमेवाभिप्रेतमार्यभटस्य। इत्थमेवाभिप्रेत्यार्यभटीयव्याख्यायां भटदीपिकायां श्रीपरमेश्वरः। किञ्चायमेव स्पष्टं ब्रवीति गोलदीपिकायाम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पूर्वाभिमुखं भ्रमति क्षोणी नास्ति भ्रमः खगर्क्षाणाम्।
इति किल वदन्ति केचिन्नाभिमतं तदपि चार्यभट्टस्य ॥

इति पद्ये [२७] लल्लवराहामिहिरादयोऽपि क्ष्माभ्रमणे कांश्चन दोषान् कथयन्तस्तन्नाङ्गीकुर्वन्ति। तदित्थम्।

१ वातो द्विविधः—भूभ्रमजो भूवाह्यश्चेति। तत्र प्रथमः क्षितेः प्राङ्मुखभ्रमणाज्जातः पश्चिमाभिमुखो महत्तमः।

द्वितीयो भुवो बहिर्द्वादशयोजनानि संचलन्नावहाभिधो लघुतमः वातोऽयं प्रथमवायावन्तर्भवति।

द्वितीयमरुतः प्रत्येकं न वस्त्वाकर्षण शक्तिः। कथं तर्हि भूभ्रमपवनाकृष्टा डयमाना विहगा मुहुः परिवर्तितस्वस्थलं चलं कुलायमासादयेयुः।

२. लक्ष्यचलनात् स्थिरशरव्यभिदो धनुर्मुक्ताः शराः कथं तल्लक्ष्यं भिन्देयुः। लक्ष्यमभिन्दाना विशिखाः सदा प्रतीच्यामेव निपतेयुः।

३. प्रतीपगभूभ्रमवाताहताः केतवो वारिदा वा सततं पश्चिमायामेव दिशि चलेयुः।

४. यथा रविबिम्बस्योदयास्तमयसमययोर्भूगोलस्य नेदिष्ठतया विपुलत्वं मध्यंदिने तस्य दविष्ठतयाणुत्वं चावभासते तथा भ्रमतो धरणिगोलस्य कदाचित् संनिकृष्टा विप्रकृष्टाश्च ताराः क्रमात् पृथुविम्बा अणुविम्बाश्च लक्ष्येरन्। न तथा कुत्रापि दृश्यन्तेतारकाः।

५. प्रत्यब्दं सकृदेवार्कमभितः स्वगत्या प्राङ्मुखं भ्रमिवत्परिवर्तमानायाः स्वाक्षोपरि भ्रमन्त्याश्च भुवोऽपसव्यभ्रमणादजादिषु संचरतो ब्रध्नस्य भूमिमभितः प्रादक्षिण्येन भ्रमणावभासनादर्कस्य मासषट्कं दक्षिणमुत्तरं चायनं संभवेत्। क्ष्मां परितः प्रदक्षिणमभ्रमतः शनेः पञ्चदशाब्दान् प्रत्येकं याम्यं सौम्यं चायनं कथमुपपद्येत। अतो धरा स्थिरैवेति प्राचांराद्धान्तः सयुक्तिकः।

अथ प्रस्तुतमुच्यते

अवनिभग्रहाणां संस्थानमानयोःप्रतिपादनाय दृष्टान्तभूतः क्षेत्रविशेष एव गोल इति व्यपदिश्यते। गोले तूर्ध्वमध्याधोभागानां दुर्निरूपतया हरिते महीगोलेऽत्र यत्र कुत्रवाभिमते स्थले मध्यबिन्दुं प्रकल्प्य तत्रैव लङ्का परिकल्पिता। तस्याः प्राच्यां प्रतीच्यामधश्च

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यथाक्रमं स्वस्वस्थलान्नवत्यंशान्तरिता यमकोटिरोमकसिद्धपुराभिधा-स्तिस्रः पुर्यो निवेशिताः। लङ्कायमकोट्यादयश्चतस्रो नगर्यः—स्वनामादिमवर्णै रङ्किताः सन्ति। आसां चतसृणां पुरीणां निरक्ष-देशसंज्ञा च प्रसिद्धा। अक्षो नाम ध्रुवोन्नतिरितिप्रागेवाभिहितम्। अस्मिन् पुरचतुष्टयेऽपि क्षितिजसक्तयोर्ध्रुवयोः समसूत्रान्तरितत्वेना-क्षाभावादन्वर्था हि निरक्षसंज्ञा। निर्गतः अक्षः यस्मात् स इति विग्रहो बोध्यः। इमानि चत्वार्यसाधारणानि निरक्षदेशलक्षणानि।

१. द्वयोर्ध्रुवयोः समसूत्रान्तरे दर्शनम्।

२. क्षितिजलग्न ध्रुवद्वय प्रोतत्वाज्जलयन्त्रवन्भस्तकोपरि सदा-भगोलभ्रमणम्।

३. विषुवन्मण्डलस्य समवृत्ताकारतया विषुवद्दिनदले तरणेर्मस्त कोर्ध्वगत्वान्न शङ्कुभा।

४. क्षितिजोन्मण्डलयोरैक्यात्सर्वदा दिन निशयोः साम्यं चेति। साक्षदेशे तु विषुवद्वृत्तस्य तिरश्चीनतयामस्तकोपरिरवेरभ्रमणाद्विषुव-द्दिनार्धे शङ्कुप्रभापतति। सैव विषुवती विषुवच्छाया पलभेति च भण्यते। लङ्कातः क्रमाद्याम्यसौम्यदिशयोर्मिथोनवतिलवान्तरितौ ध्रुवौ वडबा-नलमेरुसंज्ञकौ। तावाद्याक्षराभ्यामङ्कितौ। एवं भूगोले परस्परं नवति-भागान्तरितानि षट् स्थानानि सन्ति। तानि नीलवर्णादिलिपिचिह्नि-तानि। गोले सर्वस्मादपि प्रदेशात् क्रियमाणानां परिधीनां साम्यसंभवात् तत्प्रदर्शनाय पूर्वापरभावेनोर्ध्वाधरगामिनी चतुर्निरक्षदेशस्पर्शिन्येका रेखा तथा याम्योत्तरभावेनोर्ध्वाधरगान्या ध्रुवद्वयगामिनी परिकराकारा परा च रेखेतिविनिर्मिता शुक्लवर्णास्तिस्रो रेखाः। अविशेषात्तासु पूर्वा-परेखैव भूमध्यपरिधिः कल्पितः। स च सप्ताङ्गनन्दाब्धि (४९६७) योजनमितः। एकस्य योजनस्य किंचिन्न्यूनाधिकभावेन पञ्च मैला इति श्रीसुन्दरेश्वरश्रौतिगणकवरः। स तु परिधिरेवं विज्ञेयः।

दक्षिणोत्तरयोः कयोश्चित्पुरयोः पलांशान्तरं योजनान्तरं च विज्ञा-यानुपातः कार्यः। यदि पलांशान्तरांशैरन्तरयोजनानि लभ्यन्ते तदा चक्रांशैः (३६०) किमिति फलं पूर्वोक्तो मध्यपरिधिः। स च निरक्ष-देशीयः। स तत्र परमः। ध्रुवात् त्रिज्याव्यासार्धेन यद्वृत्तं विरच्यते स एव मध्यपरिधिः। त्रिज्या च चतुर्विंशी ज्या। सैव चक्रकला (२१६००) मितपरिधिवृत्ते व्यासार्धं भवति। अथ तदानयनम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भनन्दाग्नि (३९२७) सितपरिधिना खबाणार्क (१२५०) समो व्यासो लभ्यते तदा चक्रकलासमपरिधिना क इत्यनुपातेन रसमुनिवसुरस (६८७६) मितो व्यासो भवति। तदर्धमेव (३४३८) त्रिज्या। धरागोले लङ्कातो याम्योत्तरदलयोः प्रत्येकं नवतिलवेषु त्रिंशत् त्रिंशदंशान्तराध्र्वधरगा हरिद्वर्णैकैका रेखा कृता। ताश्चोभयतः षड्रेखा भवन्ति। स एव स्फुट-भूपरिधिः। स तु स्वदेशीयः। स च मध्यमपरिधेर्न्यूनः। स च प्रतिदेशं भिन्नः। स तु ध्रुवद्वये शून्यम्। स एवमानेयः। खस्वस्तिक-ध्रुवयोरन्तरं लम्बांशाः। त एवाक्षांशोना नवतिलवाः स्युः। खस्वस्तिक-कलक्षणमग्रेवक्ष्यते। तेषां लवानां ज्योत्पत्तिविधया या ज्या सैव लम्बज्येतिकथ्यते। तदेव स्वदेशभूव्यासार्धम्। अथ तदानयनम्। ध्रुवं केन्द्रं प्रकल्प्य तस्माल्लम्बज्याव्यासार्धेन यद्वृत्तं विरच्यते स एव स्फुटभूपरिधिरिति निगद्यते। त्रिज्यया मध्यमपरिधिरवाप्यते तदा लम्बज्यया किमिति फलं स्पष्टभूपरिधिः।

पृथिवीगोले प्रोतायामूर्ध्वाधरगायामायतायां सूक्ष्मशलाकायामूर्ध्व-मधश्च संसक्ता उपर्युपरि यथोत्तरमुपचिताः समवृत्ताः शशिज्ञकविरवि-कुजेज्यार्किनक्षत्राणां कक्षा निविष्टाः। तास्तत्तत्खगोक्तवर्णाङ्किता वर्तन्ते। धरामभितो भ्रमतां चन्द्रादितारकान्तानां ज्योतिषां वर्णास्त्वेवं ज्ञेयाः।

१ शशिनः सितः
२ चान्द्रेः हरितः
३ भृगोः चित्रः
४ तरणेः रक्तः
५ भौमस्य अतिरक्तः
६ गीष्पतेः पीतः
७ सौरेः कृष्णः
८ तारायाः शुक्लः—इति।

Bhagwan's Sri Sankaracharya ... 864

आसु कक्षासूभयतो ग्रहाभिव्यञ्जकास्तत्तद्वर्णा बदरमात्रा मणयश्च प्रोताः सन्ति। भुवः समन्तादेवेन्द्वादयः समवृत्तासु स्वकक्षासु भ्रमन्तीति प्राचांज्योतिर्विदां सिद्धान्तः।

एतेन नव्यानां ज्योतिर्विदां रविं परितो भृगु शशि भूमि भौम शनीनां दीर्घवृत्तेषु परिभ्रमणोक्तिर्ग्रहकक्षाक्रमः कक्षाणां दीर्घवृत्तत्वकथनं भुवो ग्रहत्वाभिधानं च दूरतोऽपास्तानि। किं तु कक्षाणां दीर्घवर्तु-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Bhawan's Sri Sankaracharya ... Mahavidyalaya ... Bharatiya Vidya

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

No.

ON MYSORE GOVERNMENT SERVICE.

CERTIFICATE OF POSTING OBTAINED

BOOK POST

M. S. P Sarma
M. A

To

M. S. P. Sarma.
Matthur - Palghat

Maharaja's Sanskrit College,
Mysore.

Funding by IKS-MoE